॥ ओ३म् ॥

मुक्तिमिच्छसि चेत्तात
विषयान् विषवत् त्यज।
क्षमाऽऽर्जवं दया शौचं
सत्यं पीयूषवद् भज॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

विद्यार्थी सेवकः पान्थ
क्षुधाऽऽर्तो भयकातरः।
भाण्डारी प्रतिहारी च
सप्त सुप्तान् प्रबोधयेत्॥

( चाणक्य-नीति )

卐 वर्षम्-८ 卐 अंकः-७ ( १७३ ) 卐 १ अक्टूबरः २०१८ तः १५ अक्टूबरमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## राष्ट्रियस्वयंसेवकसंघ-माध्यमेन ''भविष्यस्य भारतम्'' विषये त्रिदिवसीयसंवादस्यायोजनम्

नवदेहली। नवदेहली स्थित विज्ञान भवने हिन्दुत्ववादि संगठनम् राष्ट्रियस्वयंसेवकसंघ माध्यमेन *भविष्यस्यभारतम्* विषये एवं त्रिदिवसीय कार्यक्रमस्यायोजनमभवत्। स्व स्वीकार्यता वर्धितुं एवं सामान्य जनानां संघं प्रति भ्रान्ति दूरीकर्तुं अस्यायोजनम् अकरोत्। मस्यै देशस्य बुद्धिजीवि वर्गः




समाजसेवि, संधकार्यकर्ता एवं च चलचित्रस्य कलाकारोऽपि भागं गृहीतवन्तः। विश्वस्य वृहद् लोकतांत्रिक संगठनम् अस्ति संघः इत्युक्त्वा विभिन्न पक्षे संघस्य विचारधारा विषये उक्तवान। संघ प्रमुखः उक्तवान यत् राष्ट्रियतायाः भावना संघस्य आत्माऽस्ति। ते उक्तवान राजनैतिक जनानां भाषणे अवधानं न दत्वा संघे आगत्य अस्य विषये अवगच्छन्तु। विभिन्न राजनैतिक दलस्य आलोचनायाः उपरान्त भागवतः उक्तवान यत् अस्माकं कोऽपि शत्रु नास्ति। सर्वे ममात्मनः अस्ति।

शेषभागः द्वितीयपुटे

## इदानीं वेदाधारित शिक्षाप्रणाल्याः आवश्यकता–बाबारामदेवः

नवदेहली। वेदैः एव भारतस्य भारतीयता अस्ति। वेदेसृष्टेः विधानमास्ति। वेदाध्ययने आत्मज्ञानं, जीवनज्ञानं एवं सर्व विज्ञानस्य अध्ययनं भवति। अतः यः वेदस्य निन्दां करोति तस्य वहिष्कारं आवश्यकम्। विचारोऽयं योगगुरू स्वामी रामदेवः भारतात्मा अशोकजी सिंहल वैदिक पुरस्कार 2018 इत्यस्य समारोहे मुख्यातिथ्य भाषणे व्यक्तवन्तः। कुरान व वाइबिले सुविचारोऽस्ति। एते




धार्मिक पुस्तकमस्ति परञ्च धर्मग्रन्थ न। ते उक्तवनतः यत् जनान् धर्मतः उपरि आगत्य चिन्तनीयम्। ते उक्तवन्तः यत् प्रधानमंत्री मोदी वेदाधारित शिक्षाप्रणल्याः पाठ्यक्रमे अनयतु। रामदेव वेदशिक्षार्थं अर्पित विश्वहिन्दुपरिषदस्य अन्ताराष्ट्रिय अध्यक्ष स्व. अशोकसिंहलस्य प्रशंसा कृतवान।

सिंहल फाउण्डेशन उदयपुरस्य पक्षतः आयोजित समारोहे अशोक सिंहल वैदिक पुरस्कार 2018 इत्यस्य वितरणं कृतवान। पंकजकुमारशर्मा, गजेन्द्रपुरुषोत्तमदानीं उत्कृष्ट विद्यार्थि पुरस्कार

शेषभागः द्वितीयपुटे

## भारतस्य उज्ज्वल–ज्ञानपरम्परायाः मूलं संस्कृतम्

-डॉ.सुरेशजोशी

मऊ, उत्तर प्रदेश। उत्तर-प्रदेश संस्कृत-संस्थानम् एवं सन्त गणिनाथराजकीय स्नातकोत्तर महाविद्यालयः, मोहम्मदावाद, गोहना मऊ, इत्यनयोः संयुक्त-तत्वावधाने सितम्बर-मासस्य 29-30 दिनांकयोः द्विदिवसीया अन्तर-विषयक-राष्ट्रिय-संगोष्ठी सुसम्पन्ना। ''भारतस्य उज्जवल ज्ञान-परम्परा संस्कृतम् एवम् अन्य-विषयाणां अन्तः सम्बन्धसन्दर्भे'' इति संगोष्ठ्याः विषयः आसीत्। अस्यां संगोष्ठ्यां भारतस्य विवधिप्रान्तेभ्यः अनेके विद्वान्सः, शोधछात्रः, स्थानीयश्चभागं गृहीतवन्तः। अस्यां 150 शोधपत्राणि प्रस्तुतानि।

प्रथम-दिवसे दीपप्रज्ज्वालन-सरस्वती-वन्दना-पूर्वकं संगोष्ठ्याः सुभारम्भो जातः। अवसरेऽस्मिन् मुख्यातिथिः उत्तर-प्रदेशसंस्कृत-संस्थानस्य अध्यक्षः डॉ.वाचस्पतिमिश्र महोदयः सम्बोधयन् उक्तवान् यत् ''भारतस्य उज्जवलज्ञान परम्पराया मूलं संस्कृतमेव वर्त्तते।''




सर्वमपि ज्ञान-विज्ञानं संस्कृतमूलकं वर्त्तते यतोहि मानवसभ्यतायाः संस्कृतेश्च ज्ञानोदयः प्रथमं भारते एव अभूत् रति ऐतिहासिकाः अपि वदन्ति। न केवलं भारतीयं ज्ञानम् अपितु निखिलस्य विश्वस्य ज्ञानं संस्कृते निहितम् वर्त्तते।

मुख्यवक्ता अखिल-भारतीय-विद्वत्-परिषदः महासिचवः डॉ. कामेश्वर उपाध्यायर्वयः सम्बोध यत् यत् संस्कृतस्य ज्ञानं विना अन्यत् ज्ञानं कपोलकल्पितमिव वर्त्तते। पाश्चात्याः अपि संस्कृतशास्त्राणि पठितुं संस्कृतिञ्च ज्ञातुं समुत्सुकाः सन्ति। भारतीयः वयं नैराश्यवन्तो न भवेम। आरम्भकालत एव ज्ञानमयः प्रदीपः संस्कृतेम एव प्रज्ज्वालितो वर्त्तते। संस्कृत वाङ्मयस्य अन्य-विषयैः सह सम्बन्ध : मम प्रियविषयः विगत पञ्चविंशति वर्षेभ्यः एतं विषयमादाय निरन्तरं कार्यं कुर्वन्नस्मि। संस्कृतं केवलं भाषा-धर्म-कर्मकाण्ड-दर्शन-साहित्यमात्रञ्च नास्ति अपितु विश्वस्य सर्वेऽपि विषयाः अत्रोल्लिखिताः सन्ति। सम्प्रति भारतसर्वकारः चतुर्दश-विषयाणां परीक्षायै यू.जी.सी द्वारा स्वीकृतिं दत्तवान्। यद्यपि अत्र केवलं चत्वारिंशत् संकायाः भवन्ति। चतुर्दशताधिक, विभागाश्च। भारतवर्षे अनेकेः विश्वविद्यालयाः सन्ति। सर्वत्र चतुर्दश-पञ्चदश वा विभागाः एव सन्ति। कियती

शेषभागः अष्टमपुटे



श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे महाकवि इच्छारामद्विवेदी 'प्रणव' इत्यस्य काव्यसंकलनम् प्रणवपरिस्पन्दस्य लोकार्पणं कृतवन् डॉ.रमाकान्तशुक्लः एवं श्रीमती रमाशुक्ला

**प्रथमपुटस्य शेषभागः**

## राष्ट्रियस्वयंसेवकसंघमाध्यमेन.....

ते स्वतंत्रता संग्रामे कांग्रेसस्य भूमिकायाः प्रशंसा कृतवान। ते उक्तवान अत्र सर्वं सर्वेषां मतानुसारेण भवति। सर्वे बुद्धिजीविनः उक्तवन्तः यत् अस्य कार्यक्रमस्य उद्येश्यं राजनैतिकं नास्ति। संघ सर्वस्य हितचिन्तकोऽस्ति। प्रशंसा कृत्वा उक्तवन्तः यत् संघः निःस्वार्थभावेन सेवा करोति।

संघे हिन्दुत्व आधृत्य ये भ्रान्ति अस्ति तं दूरीकृत्वा भागवतः उक्तवान् यत् संविधाने हिन्दुत्वस्य अर्थोऽस्ति भ्रातत्व भावना। येषु अन्येषां प्रति सम्मामस्ति। ते उक्तवान हिन्दुत्वस्याधारः वशुधैव कुटुम्बकमस्ति। राष्ट्रस्य परिचायक रुपे संघ हिन्दुत्वं स्वीकृतवान्। हिन्दुत्व दर्शने कस्यापि धर्मस्य आलोचना नास्ति।

**प्रथमपुटस्य शेषभागः**

## इदानीं वेदाधारित...

श्रीधरअदी व गुल्लपल्ली सीतारामर्मूति आदर्श वेदाध्यापक पुरस्कारेण पुरस्कृतवन्तः। श्रीसदगुरू निजानन्द महाराज वेदविद्यालयं सर्वश्रेष्ठ वेदविद्यालयस्य पुरस्कारः प्रदत्तम। विनायकमंगलेश्वर बादलं वेदाध्ययनं व वैदिक शिक्षायां आजीवन कार्यकरणाय लाइफटाईम अचीवमेन्ट पुरस्कारेण पुरस्कृतः।

अस्मिन्नवसरे स्वामि गोविन्दगिरि उक्तवान् यत् अद्य वेदान् एतादृशं सम्मानं न मिलति यस्याधिकारी सः वर्तते। फाउण्डेशनस्य पुरस्काराणां माध्यमेन सर्वत्र वेदस्य प्रचार-प्रसारं प्रलसति समारोहे श्री अरविन्द सिंहल, सलिलसिंहल, संजयसिंहल उपस्थिताः आसन्।

# सम्पूर्णदेशे प्रचलिष्यति शान्तिमयं गंगाआन्दोलनम्

नवदेहली। जीवनदायनी गंगा अद्य शासन-प्रशासन एवं जनानां उपेक्षया मृतो जातः। एतादृशी परिस्थित्यां गंगा प्रेमी पुनः निर्मलम् एवं नद्यां न्युनतम जलस्तरस्य करणेन् देशे आन्दोलनं प्रचालसन्ति। प्रो.जी. डीअग्रवाल (स्वामीसानन्द) हरिद्वारे 87 दिवसप्राक् अनशनं करोति स्म अनेनैव अस्य आन्दोलनस्य महत्वमधिकं जातम्। अतः अत्र गाँधी शान्ति प्रतिष्ठाने रविवासरतः आयोजित त्रिदिवसीय गंगा सम्मेलने समागत गंगा प्रेमि तेषां तपस्यां शान्तिपूर्ण जनान्दोलने परिवर्तन विषये चिन्तयति। सम्मेलने सर्वाषां नद्यां विषये विचारो अभवत्। एषु राज्यतः शताधिक गंगा प्रेमि भागं गृहनन्ति।



पर्यावरण प्रेमि सदानन्द महोदयस्य स्वास्थ्य विषये चिन्ता व्यक्तवन्तः। तेषां प्रण विषये केन्द्र सरकारं सूचितवन्तः। जलपुरुष राजेन्द्र सिंहः उक्तवान यत् अद्य विकास्य नाम्नि सर्वकारः नदीं विस्मृवान्। ते केन्द्र सर्वकारं उक्तवान यत् यथा मनुष्यं जीवनयापनाय अधिकारं प्राप्तमस्ति तथैव नद्याः अपि अधिकारोऽयं भवितव्यम्।

एकदा परिषदस्य संस्थापक पीपीराजगोपालः उक्तवान सम्पूर्ण विश्वे विकारस्य नाम्नि जलस्य दोहनं एवं शोषणं भवति। इदामीं विश्वे जलसंकटोऽस्ति। नद्याः आस्तित्वं संकटसस्तोऽस्ति। गाँधी शांति प्रतिष्ठानस्य अध्यक्ष कुमारप्रशांत उक्तवान यत् गंगा सर्वेषां रक्षा कुर्वन्ति परञ्च अस्योपरि कस्यापि ध्यानं नास्ति।

# आधुनिकता प्राचीनतायाः गर्भात् समुत्पन्ना

उत्तरप्रदेशस्य विधानसभा अध्यक्ष हृदयनारायणदीक्षित प्रज्ञा प्रवाहस्य पक्षतः आयोजित चतुर्दिवसिय लोकमंथन कार्यक्रमे उद्घाटन सत्रस्य संबोधनाय राँची मध्ये सन्ति। लोकमंथस्य व्यस्त कार्यक्रमेन समयं निस्यार्य दैनिकजागरणेन सह वातालापं कृतवन्तः। ते उक्तवन्तः यत् वयं आधुनिकता विषये चर्चा करोति स्म परञ्च अस्य स्वरुपं एतादृशं भवेत् यादृशं पूर्वमासीत्। ऋग्वेदे उक्ते यत् पृथ्वी माता अस्ति एवं वंकिमचन्द्र चटर्जि सुजलां सुफलां उक्तवन्तः। आर.एस.एस.नमस्ते सदा वत्सले उक्तवन्तः। एतादृशमेव परम्परा आधुनिकता अस्ति। पुराणे सागरमंथनमस्ति सोऽपि लोकमंथनमासित्। अनेन आत्मियता आगच्छति। ते उक्तवन्तः यत् भारते पूर्वमेव विभिन्न विषयेषु विमर्शः भवति। इदानीं संस्कृति सभ्यता एवं दर्शन एवं आस्था विषये चिन्तनं भवति। भारतीय संस्कृते स्वच्छन्दता अस्ति। भारते सर्वेभवन्तु सुखिनः अस्ति। ते उक्तवन्तः यत् पौराणिक सागर मंथननैव अमृतोद्भव अभवत् तस्यैव प्रभावः समाजे अस्ति। आर.एस.एस.प्रमुख मोहनभागवतः किञ्चित् प्राक् देहल्यां भविष्यस्य भारतम्, संघस्य ध्येयः कार्यपद्धति एवं भारतस्य जानानां स्वप्ने



विचारं व्यक्तवन्तः। अस्योपरि बहुविवादमभवत् परञ्च दैनिक जागरणः सकारात्मक दृष्टिः प्रदर्शितवान। ते उक्तवन्तः यत् राष्ट्रस्य समृद्धि सर्वोपरि वर्तते। अनेनैव भारतस्य ख्याति सर्वत्र भविष्यति।

# हिन्दी-पक्षोपलक्ष्ये अन्तर्महाविद्यालयीय-प्रतियोगितायाः आयोजनम्

नवदेहली। भारतीयभाषामञ्च एवं मोतीलालनेहरू महाविद्यालयस्य संयुक्त तत्वावधाने हिन्दी पक्षस्य आयोजनमभवत्। एषु वाद-विवाद स्वरचित कविता पाठ एवं आशुभाषण प्रतियोगितायाः आयोजनमभवत्। मोतिलालनेहरू महाविद्यालये प्रथमदिवसे अस्य सफल कार्यक्रमे छात्र एवं छात्राः सम्यक् रुपेण भागं गृहीतवन्तः। संदीपकुमार एवं हिन्दीविभागस्य प्राध्यापकाः एवं छात्राः कृतवन्तः। सर्वे विजेतृणाम् पुरस्कारं प्रदत्तम्। वक्ता राष्ट्रभाषा हिन्दी विषये बलं दत्तवान एवं छात्राः अपि आधुनिक विषयोपरि काव्यं प्रस्तुत्य सम्मोहनं कृतवन्तः।

प्रथमदिवसे भारतीयभाषामंच माध्यमेन श्री वेंकटेश्वर




एषु स्वामी श्रद्धानन्द, मिरांडा हाऊस, हिन्दु कॉलेज, रामजस, रामलालआनन्द, रमानुजन, गार्गी आदि महाविद्यालस्य एवं जमिया विश्वविद्यालयस्य छात्र-छात्राः आसन्। कार्यक्रमस्य अध्यक्षता श्री अनिलतेजराणा कृतवान। विशिष्टातिथि रूपे श्री नरेशसैलाब, श्री ईश्वरदयालकंसल, डॉ.अशोककुमार, डॉ.हंसराज, डॉ.वी.दयालु, डॉ.श्रीवत्स उपस्थिताः आसन्। कार्यक्रमस्य सम्पूर्ण व्यवस्था डॉ. महाविद्यालयेऽपि कार्यक्रममासीत्। अत्र मुख्यातिथि रुपे डॉ. वेदप्रतापवैदिक आसन्। कार्यक्रमस्य अध्यक्षता डॉ. भूदेव कृतवान। डॉ. सोमनाथदीक्षित एवं श्री.के.सी.मित्रत्व विशिष्टातिथि आस्ताम् डॉ.वैदिक हिन्दी भाषां स्व अधिकार प्रदार्थं आण्दोलनस्य आह्वाहंन कृतवान् एवं जनता मध्ये गत्वा संवादस्य विषये उक्तवान्। तत्र ईश्वरदयालकंसल, श्री संदीप उपाध्याय, श्री संजयस्वामि आदि उपस्थिताः आसन्।





**उत्तराखण्डसंस्कृतअकादमी माध्यमेन आयोजित संस्कृत छात्र प्रतियोगिताया 95 विकासखण्ड, 13 जनपदानां प्रयासः 97000 संस्कृत छात्र-छात्राः भागं गृहीतवान। येषु खण्डस्तरे, जनपदस्तरे अनेकेषु कार्यक्रमेषु सहभागी भवितुं गौरवं प्राप्तवान्। राज्यस्तरीय प्रतियोगितायां श्रीमान् भगतसिंहकोश्यारी, पूर्वमुख्यमंत्री उत्तराखण्ड एवं वर्तमान सांसद नैनिताल, श्रीमान् प्रतापसिंहजी, क्षेत्रिय संगठन मंत्री, संस्कृत भारती, डॉ. भोलाझा डॉ. संजुप्रसादध्यानि, डॉ. दीपकनवीन, डॉ राकेशशर्मा, श्री रोशनगौड़, अकादम्याः सचिव श्री गिरिधरसिंहभाकुनी, कोषाध्यक्ष श्रीनवीननैथानि एवं अकादम्याः अधिकारी कर्मचारी तेन सह मिलित्वा कार्यक्रमः सम्पन्नः जातः।**

# लज्जाष्टकम्

-डॉ.अरविन्दतिवारी

प्रणम्य पादौ विदुषां कवीनां
जातः पुरस्कारसुखाभिलाषी।
ख्यातः कवीन्द्रः श्रुतवान् सभायां
गर्जन् प्रभाषे न लजे विलज्जः।। 1

योग्यानपाकृत्य विधाय पूजां
गुरुप्रसादेन पुरस्कृतिर्या।
लब्धा मया सा प्रददाति गालिं
निशम्य चेतो लजते विलज्जम्।। 2

संवाह्य पादौ लभते नरो यः
श्रुतं पुरस्कारमसौ विधिज्ञः।
जीवन् न मुक्तिं त्वधिगम्य तुष्टो
निन्दन्गुणाढ्यो लजते विलज्जः।। 3

कविर्ह्यसौ हा म्रियतां विमूढः
पुरस्कृतिं कामयते य एवम्।
तस्माद्वरं किं मरणं न लोके
न चिन्तयन् ना लजते विलज्जः।। 4

यस्मिन् दिने मे मुखतो वचांसि
विनिर्गमिष्यन्ति तदर्थमेव।
तस्मिन् दिनेऽहं मृतवान् भवेय-
मित्थं मनो मे लजते विलज्जम्।।5

सरेद् यशो मे बहु काङ्क्षितं तद्
गतं विदूरं मनसो ममैतत्।
स्वयं मिलेद्यः सुरभारतीजः
तं कामयेऽहं न लजे विलज्जः।। 6

काव्यं कवीनां सरसं जनानां
चेतस्सदा कासयतीव जाने।
एतत्पुरस्काररवस्तु कर्णौ
मन्ये भिनत्तीव लजे विलज्जः।। 7

हे शारदे भारति वाणि मातः
नो कामना मे तनयस्य तेऽद्य।
शिरस्प्रदेशे चरणस्य धूलिः
पुरस्कृतिस्यान्न लजे विलज्जः।।8

लज्जाष्टकमिदं प्रातर्धृत्यासौ सम्पठेद्बुधः।
पुरस्कारविलिप्सा तं तापतीव न मानिनम्।।

# राष्ट्रं निर्माति संस्कृतम्!

-डॉ.सुरेन्द्रमोहनमिश्रः,
कुरूक्षेत्रम्

वर्णाश्रममहाधर्मं, निगमागमबोधितम्।
बोधयच्चार्ययद्विश्वं, राष्ट्रनिर्मातृ संस्कृतम्॥ 1

वेदवेदान्तवेदाङ्गो-, पाङ्गोपवेदमिश्रिताः।
चतुषष्टिं कला बिभ्रद् , राष्ट्रनिर्मातृ संस्कृतम्॥ 2

चातुर्वर्ण्ये निषादे च, पञ्चमे पञ्च ते जनः।
सवर्णाऽवर्णतां भिन्दद् , राष्ट्रनिर्मातृ संस्कृतम् ॥ 3

स्पृश्यास्पृश्यमहाव्याधिं, यवनैः प्रतिपोषितम्।
अनार्यजुष्टदोषघ्नं, राष्ट्रनिर्मातृ संस्कृतम् ॥ 4

सभ्यतां संस्कृतिं धर्मं, राष्ट्रे राष्ट्रे दधच्छ्रिये।
कुटुम्बयत्सदा विश्वं, राष्ट्रनिर्मातृ संस्कृतम् ॥ 5

भाषैक्यं भावनास्वैक्यं, क्रियास्वैक्यं ह संदधत्।
? तत्सदितिनिर्देशं, राष्ट्रनिर्मातृ संस्कृतम् ॥ 6

सदाचारसदाधारं, भ्रष्टाचारविखण्डनम्।
वाचा भावं क्रियां शास्ति, राष्ट्रनिर्मातृ संस्कृतम् ॥ 7

सनातनो विश्वगुरुः,भारतं हन्त भास्वरम्।
दिव्यजीवनसंयोक्तृ, राष्ट्रनिर्मातृ संस्कृतम् ॥ 8

राष्ट्र ! राष्ट्रियबालेषु , दश वर्षाणि सिञ्च भोः!
संस्कृतामृतसेकं तं, राष्ट्रनिर्मातृ संस्कृतम् ॥ 9

स्वधर्मो राष्ट्रजनकः, धर्म- संस्कृतशास्त्रभूः!
पुनरूर्जतु कल्याणं, राष्ट्रनिर्मातृ संस्कृतम् ॥ 10

जाग्रतोत्तिष्ठतों पुत्राः, स्मरताखण्डभारतम्।
योगस्था हन्त युध्यध्वं,राष्ट्रं निर्मातु संस्कृतम् !! 11

# नवराष्ट्रं रचयिष्यामः

डा0 वेदव्रतः
संस्कृत-विभागः, राजकीयमहाविद्यालयः,
लोहाघाटम्, चम्पावतम् (उत्तराखण्डम्) 9411425614

क्रियतामतिशयसंकल्पो नवराष्ट्रं रचयिष्यामः।
नवमितिहासं नवकाव्यं नवगाथाम् लेखिष्यामः।।

निजदेशमलंकर्तुं हि कल्पना नवा करणीयाः।
भूयात् भारती भव्या रचना अभिनवा विधेयाः।
स्तुतये मातुर्भारत्याः स्तोत्रं हि नवं गास्यामः।।1।।

पथि विपदो बहुलास्सन्ति न हि पदावरोधो भवतु ।
सोत्साहं परिश्रमेण सर्वं देशाय जहातु।
मरणं देशार्थं भवतु देशार्थं जीविष्यामः ।2।।

ससुखं सज्जना वसन्तु कन्या अभयं विहरन्तु।
प्रतिवेशिनः प्रीताः प्रीतिं मनसा वपुषा कुर्वन्तु।
सौख्यं वितरन्तु देवा इति हृदा वयं नंस्यामः।।3।।

# संस्कृतभाषां मा दूषयतु

दूरदर्शने वार्तावलि नामके कार्यक्रमे संस्कृतभाषायाः गतिविधिनां चर्चा मध्ये हिन्दी चलचित्रस्य गीतं ददाति यस्य अनुवादं संस्कृते करणाय कथयति यदि तस्य भाव-विचारं सम्यक् भवेत् तर्हि समिचिनोऽस्ति परञ्च यदि नास्ति तर्हि तस्यानुवादेन अस्मान् संस्कृतज्ञानां ज्ञानम्, समयः एवं शक्तेः दुरुपयोगमेव भविष्यति। समाजः संस्कृतं सम्मानस्य दृष्ट्या पश्यति एवं श्रावयति तां देवभाषा कथ्यते। अतः करबद्ध निवेदनमस्ति यत् लोकप्रिय कर्तुं ''जाती हूँ मैं जल्दी है क्या'' एतादृशं गीतं माध्यमेन मा दूषयतु। यस्य इच्छा अस्ति सः युट्युब मध्ये गत्वा श्रुनोतु/परञ्च वार्ताल्यां अस्मिन् पक्षे उक्त निर्दिष्ट गीतं अनुवादं करणाय उक्तवान्। येन संस्कृतस्य अवहेलना भविष्यति न वा कोऽपि संस्कृतज्ञः अस्मिन् विषये चिन्तितम्। वयं शुद्ध पवित्र संस्कृतं एतादृशं गोयतानुकुल चलचित्रस्य संस्कृत गीतं माध्यमेन एतावत दूषितं करिष्यामः यत् पञ्चाशत वर्षोपरान्त अपि भवतां पूर्वजः बुद्धिमान भविष्यति तं चिन्तयित्वा एव अस्य निर्माणं अकुर्वन तर्हि इदानीं अस्य विरोधं किमर्थम्। संस्कृत भाषायाः संरक्षणम् द्वयेव कुर्तुं शक्यते। एकम तु ये संस्कृतस्य विद्वान्सः सन्ति एवं द्वितीयम तु ये संस्कृतं न जानन्ति परञ्च तेषां श्रद्धा तत्र वर्तन्ते। वयं मिलित्वा एव अस्य संरक्षणं कर्तुं शक्नुमः। परञ्च एतादृशं गीतास्यानुवादं कुर्वन्तु येन वार्तावली उपहारस्य विषयः न भवेत इति।

-वेदरूचि रामचन्द्र आर्य
आदिपुर ( कच्छ-गुजरात-भारत )

दूरस्थशिक्षामाध्यमेन संस्कृताध्ययनाय स्वर्णिमोऽवसरः
मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासन-मानवसंसाधनविकास-मन्त्रालयाधीनः)
56-57, साँस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली-110058
Ph. 011-28523611, mspeetham@gmail.com,
www.msp.rsks.in, www.sanskrit.nic.in/msp.htm

प्रवेशसूचना : २०१८-२०१९

1. प्राक्शास्त्रिसेतुः, 2. प्राक्शास्त्री (+2), (व्याकरणम्-साहित्यम्-फलितज्योतिषम्) 3. शास्त्रिसेतुः (व्याकरणम्-साहित्यम्-फलितज्योतिषम्), 4. शास्त्री (बी.ए.), (व्याकरणम्-साहित्यम्-फलितज्योतिषम्) 5. आचार्यसेतुः (व्याकरणम्-साहित्यम्-फलितज्योतिषम्), 6. आचार्यः (एम.ए.), (व्याकरणम्-साहित्यम्-फलितज्योतिषम्) 7. संस्कृतपत्रकारिताप्रमाण-पत्रीयपाठ्यक्रमः, 8. पालिप्रमाणपत्रीयपाठ्यक्रमः, 9. प्राकृतप्रमाणपत्रीयपाठ्यक्रमः', 10. पालिपरिचयपाठ्यक्रमः, 11. प्राकृतपरिचयपाठ्यक्रम इत्यादिषु प्रवेशार्थम् आवेदनपत्रम् अन्तर्जालमाध्यमेन पूरयतु।

आवेदनतिथिः (बिना विलम्बशुल्केन) २०.१०.२०१८ पर्यन्तम्
आवेदनतिथिः (रु. 500/- विलम्बशुल्कसहितम्) : २१.१०.२०१८ से २७.१०.२०१८
(प्रवेशपरीक्षां विना प्रवेशार्हाणां कृते)
ऑन-लाईन आवेदनपत्रं विश्वव्यापिजालपुटात् www.msp.rsks.in अपि स्वीकर्तुं शक्यते।
प्रवेशपरीक्षातिथिः : २८.१०.२०१८ (रविवासरः)
निदेशकः



# सम्पादकीयम्

सम्मान्या विद्वांसो विदुष्यः!

सादरं नमो नमः।

संस्कृतसंवादस्य नवांकं भवतां भवतीनां करकमलेषु उपायनीकुर्वती प्रकाममानन्दमनुभवामि। भवतां भवतीनामेव प्रेरणया पाक्षिकपत्रमेतत् प्रकाश्यमानमस्ति। सुरभारती पीयूषवर्षिणी वर्तत इति भाषन्ते संस्कृतज्ञाः सत्यमेव। अस्या भाषायाः सौन्दर्यं कं जनं नापहरति। सर्वविद्यानां दार्शनमस्मिन्नेव संस्कृते सर्वैरपि कर्तुं शक्यते। प्रायः देशस्य सर्वास्वपि संस्थानासु संस्कृतसंस्थानेषु विद्यालयेज़ु संस्कृतं प्रति सम्प्रति यादृश उत्साहो दृश्यमानो वर्तते, तादृशो गतवत्सरेषु नावलोकितः। विविधा आयामाः देववाणीसंरक्षणाय कोविदैस्समाश्रिताः। क्वचित् छन्दोलेखनकार्यशाला समारब्धा, क्वचित् नवनवविषयोपेता सङ्गोष्ठी मनांसि अहरदिति प्रमोदस्य हेतुरिति। दूरर्शनेनापि संस्कृतस्य महान् विकासः कृतो वर्तत इति निस्संशयं वक्तुं शक्यते। किन्तु केवलं संस्कृतमुच्यतामिति कथनेनैव संस्कृतस्य संरक्षणं भारतीयसंस्कृतेः प्रचारो वा भवितुमर्हति। यावन्नो संस्कृतानुरागिणो निर्मत्सरा भवन्तो संस्कृताय यतिष्यन्ते। यावत् वसुधैव कुटुम्बकमिति भावना हृदये न विराजिष्यते, केवलं मुखेन कथनेन न लक्ष्यसम्प्राप्तिर्भविता। अतः मुक्तकण्ठेन सुरभारती विजयतामिति ब्रुवाणाः समदिर्शिनो विद्वांसः संस्कृताय चिन्तयन्तु। अस्मिन् निहितं ज्ञानं विज्ञानं दुर्लभं सर्वमपि प्रकाशयन्तु। येन संसारो जानीयात् यत् संस्कृते अस्ति सर्वमपि। सर्वकारोऽपि सम्यक् पश्यतु संस्कृतम्। सर्वत्र कनिष्ठकक्षास्वपि संस्कृतम् अनिवार्यं करोतु, येन संस्कृतानुरागिणां समक्षं वृत्तिविचिकित्सा न समुत्पद्येत। यावन्तः संस्कृताध्येतारो वर्तन्ते तावती वृत्तिर्न दृश्यते देशे। अतस्सर्वकारः चिन्तयतु यत् सुयोंग्या एते स्वानुरूपं पदं लभन्ताम्। संस्कृताज्ञानमपि एतद् दायित्वमस्ति यत् तथाविधं शास्त्राणि विज्ञाय निजपाण्डित्येन जयन्तु लोकम्। सर्वत्र वेदरवः समाकर्ण्यताम्। यज्ञधूमो दिशि दिशि प्रसरतु। सर्वे समानदृष्टयो विलोकयन्तु परोपकारमार्गम्। आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः इति भावनामुद्भावयन्तु। इदमेव विनिवेद्य प्रणमन्ती विरमामि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**नक्तोषासा सुपेशसास्मिन् यज्ञ उप ह्वये।**

**इदं नो बर्हिरासदे॥७॥**

अर्थ-मनुष्यों को उचित है कि इस संसार में विद्या से सदैव उपकार लेवें, क्योंकि रात्रि-दिन सब प्राणियों के सुख का हेतु होता है ॥७॥

अब अगले मन्त्र में उन अग्नियों का उपदेश किया है कि जो शुद्ध करनेवाले विद्युदरूप से अप्रसिद्ध और प्रत्यक्ष

स्थूलरूप से प्रसिद्ध हैं

**ता सुजिह्वा उप ह्वये होतारा दैव्या कुवी।**

**यज्ञं नो यक्षतामिमम्॥८॥**

अर्थ-जैसे एक बिजुली, वेग आदि अनेक गुणवाला अग्नि है इसी प्रकार प्रसिद्ध अग्नि भी है। तथा ये दोनों सकल पदार्थों के देखने में और अच्छे प्रकार क्रियाओं में नियुक्त किये हुए शिल्प आदि अनेक कार्यों की सिद्धि के हेतु होते हैं। इसलिए इन्हीं से मनुष्यों को सब उपकार लेने चाहिए॥8॥

वहाँ तीन प्रकार की क्रिया का प्रयोग करना चाहिए, इस विषय का उपदेश अगले मन्त्र में किया है-

**इळा सरस्वती मही तिस्रो देवीर्मयोभुवः।**

**बर्हिः सीदन्त्वस्रिधः॥९॥**

अर्थ-मनुष्यों को 'इडा' जोकि पठन-पाठन की प्रेरणा देनेहारी, 'सरस्वती' जो उपदेशरूप ज्ञान का प्रकाश करने और श्महीश जो सब प्रकार से प्रशंसा करने योग्य है, ये तीनों वाणी कुतर्क से खण्डन करने योग्य नहीं हैं, तथा सब सुख के लिए तीनों प्रकार की वाणी सदैव स्वीकार करनी चाहिए, जिससे निश्चलता से अविद्या का नाश हो॥९॥

फिर वहाँ क्या-क्या करना चाहिए, इस विषय का उपदेश अगले मन्त्र में किया है

# योगदर्शनम्

डॉ अरविन्दकुमारतिवारी

(अस्मिन् निबन्धे योगदर्शनस्य विषये तिवारिणा विशिष्टं किमपि चिन्तितमस्ति। आधुनिकयुगे योगस्य चर्चा निखिलेऽपि संसारे क्रियते। योगेन जनाः स्वास्थ्यलाभाय समुत्सुका दृश्यन्ते। अतः प्रासङ्गिकोऽयं विषयः पाठकानां समक्षमुपस्थाप्यते। श्रीमता योगस्य विषय दार्ढ्याय द्वौ लघुनिबन्धावेकस्मिन् ग्रथितौ योगविजिज्ञासूनां जिज्ञासापरिशमनायेति)

क योगशास्त्रस्य सङ्क्षिप्तमैतिह्यम्

भारतीयदर्शनपरम्परायां योगदर्शनस्य विशिष्टं स्थानमस्ति। इदं दर्शनं वैदिककालत एव प्रसिद्धं वर्तत इति श्रूयते। योगः सनातनो मन्यते योगिनां मुनीनां ऋषीणां देशे भारतेऽस्माकम्। ऋग्वेदादिषु योगशब्दः बहुधा प्रयुक्तः अस्य योगस्य प्राचीनत्वं प्रमाणयति। वयं भारतीयाः स्वविद्यानां मूलं वेदमेव मन्यामहे, वेदानां सकलविद्यास्रोतोभूतत्वादिति।

द्वा सुपर्णा सयुजा सखायौ समानं वक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्न्यो अभिचाकशीति।।

1

अत्रापि योगतत्त्वानि दृश्यन्त एवेति । एकः सांसारिकः अपरः अनश्नन् यः पक्षी सः तपस्वी तपसा प्रकाशमानो वर्तते। अन्येऽपि मन्त्रा यत्र योगस्य समुल्लेखो लभ्यते। यथा

यस्मादृते न सिध्यति यज्ञो विपिश्चितन। स धीनां योगमिन्वति।

2

युक्तेन मनसा वयं देवस्य सवितुः सवे स्वर्ग्याय शक्त्या।3

योगे योगे तवस्तरं वाजे वाजे हवामहे। सखायः इन्द्रमूतये।

4

उपनिषत्स्वपि योगो विख्यातिं गतो वर्तत इत्यपि विदन्ति विज्ञाः। इदं स्पष्टं वक्तुं शक्यते यद् योगविद्या महर्षेः पतञ्जलेः प्रागपि भारतीयैर्विज्ञातासीत्। यथा–

मातृदेवो भव, पितष्देवो भव, आचार्यदेवो भव, स्वाध्यायान्मा प्रमदः, सत्यं वद, धर्मं चर,5 इत्यादिवैदिकसदुपदेशवाक्यानि योगबीजान्येव मन्यन्ते। इत एव महर्षिणा पतञ्जलिना यमनियमादीनां सङ्कलनं कृतमस्तीति प्रतीयते। चान्यतः अन्यदिति। यथा– यमेषु परिगणितं सत्यं समुपलभ्यते चात्र, तपस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः6 इत्यत्रापि प्रयुक्तः स्वाध्यायशब्दः प्रमाणयति यत् वेदोपनिषद्विद्यैव योगदर्शनस्य मूलानि सन्ति। कठोपनिषदि नचिकेतसो 7 वचनं – न वित्तेन तर्पणीयो मनुष्यः इत्यनेनापि नियमेषु परिगणितः सन्तोषः एव प्रमाणीक्रियते। सावधानतया अन्वेषणे कृते सर्वमपि योगशास्त्रीयं तत्त्वं वेदोपनिषदाश्रितमेव दृश्यते। मनोनिग्रहचर्चापि उपनिषत्सु बहुधा कृता वर्तते। यथा माण्डूक्योपनिषदि

मनसो निग्रहायत्तमभयं सर्वयोगिनाम्।

दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च।। 8

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना।

मनसो निग्रहस्तद्वद् भवेदपरिखेदतः।।9

अत्र स्पष्टतया योगिनां मनसो निग्रहः इति पदानि योगविद्यायाः प्राचीनत्वं प्रकाशयन्ति।

अतः ईसापूर्वद्वितीयशताब्द्यां महर्षिपतञ्जलिर्योगदर्शनं व्यरचयत्। अयं कालः पुष्यमित्रशासकस्य वर्तते। यतोहि महाभाष्ये बहुधा महर्षिणा पुष्यमित्रं यजामहे, पुष्यमित्रं स्मरसि देवदत्त। इत्यादि स्मृतमस्ति। स्वयं च अथ योगानुशासनं प्रथमं सूत्रमपि प्रमाणयति योगः प्राचीनः, अस्मिन् दर्शने अस्य अनुशासनं व्यवस्थापनमेव क्रियते। शिष्टस्य शासनम् अनुशासनम्।

अत्र विचार्यते यत् किं वैदिककालादारभ्य या योगविद्या भारते प्रचलितासीत् सा कथं ईसापूर्वद्वितीयशताब्द्यां व्यवस्थापिता? किं नासीत् कश्चिदाचार्यो य एवं कर्तुं शक्नुयादिति। अस्य जिज्ञासायाः समाधानं श्रीमद्भगवद्गीतायामवाप्यते। पंचमाध्याये भगवान् श्रीकृष्णः योगविद्यां समुपदिशन् भाषते यत्–

इमं योगं विवस्वते प्रोक्तवानहमव्ययम्।

विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।

स कालेनेह महता योगो नष्टः परन्तप।।

स एवाय मया तेऽद्य योगः प्रोक्तः पुरातनः

भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।। 10

अनेनैव श्रीमद्भगवद्गीतावचनेन योगाचार्यक्रमनिर्धारणं कर्तुं शक्यत इत्यनुमिनोमि।

सर्वप्रथमं

कपिलं परमर्षिं च यं प्राहुर्यतयः सदा।

अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्तकः11।

कपिलो नाम विष्णोरवतारविशेषः प्रसिद्धः स्वयम्भूर्हिरण्यगर्भस्तस्यापि साङ्ख्ययोगप्राप्तिर्वेदे श्रूयते।12 अर्थात् कपिलमुनिः योगविद्यायाः प्रथमः आचार्यः, पञ्चशिखसूत्रमपि प्रमाणयति यत्

आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये तन्त्रं प्रोवाच। 13

यद्यपि विशेषतो जानन्ति जनाः यत् कपिलमुनिः केवलं साङ्ख्यदर्शनस्य वक्ता आसीत्। हन्त! नैतद् अयमाचार्यः साङ्ख्ययोगस्य वक्ता आसीदिति श्रूयते। तदुपरि प्रमाणितमेवास्ति। साङ्ख्ययोगयोर्न भेदः कश्चन मन्तव्यः। श्रीमद्भगवद्गीता प्रमाणयति यत्

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।

एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।। 14

अतः समानदर्शनत्वादस्य वक्ता कपिलमुनिरेव सम्मन्यते। अनेन मार्गेण सनातनयोगविद्यायाः प्रथमः वक्ता कपिलमुनिः तेन आसुरये सक्रान्ता योगविद्या, ततः अन्येषु आचार्येषु येषां नामादिसङ्केतो न लभ्यते। पुनः भगवान् श्रीकृष्णः विवस्वते विवस्वान् मनवे मनुरिक्ष्वाकवे योगविद्यामदुः। ततः अनेके राजर्षयो योगमिमं विदुः। किन्तु कालवशात् स क्वचिल्लुप्तो योगः पुनः द्वापरे अर्जुनाय भगवता श्राविता। ततश्च ईसापूर्वद्वितीयशताब्द्यां 15 भगवता पतञ्जलिना योगसूत्राणि विरचितानीत्येव योगाचार्यक्रमः।

सन्दर्भाः


1 ऋग्वेद 1/164/20

2 ऋग्वेद 1/18/7

3 यजुर्वेदसं11/2

4 ऋग्वेद1/30/7

5 तैत्तीरीयोपनिषदि शिक्षावल्ल्यां

6 योगसूत्रम् 2/1

7 कठोपनिषत् 1/27

8 माण्डूक्योपनिषत् 40

9 तत्रैव 41

10 श्रीमद्भगवद्गीता 5/1–3

11 महाभारत 11/3/65

12 तत्त्ववैशारदी 1/25

13 पञ्चशिखसूत्रम् 1

14 श्रीमद्भगवद्गीता 5/4

15 पातंजलयोगदर्शनम्, हिन्दीव्याख्याकारः डॉ सुरेशचन्द्रश्रीवास्तवः। चौखम्भा प्रकाशनं वाराणसी। पृ0सं0 20



**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**

**Indian Overseas Bank, Yamuna Vihar,**

**Delhi-110053**

**IFC Code- IOBA0002249**

# योगाचार्यविषयिणीं वाचमुपस्थाप्य योगस्य उपयोगिताविषये विलिख्यते

ख विश्वशान्तये योगस्य उपयोगिता

अहह! प्रतिपलं विकासमधिरूढः संसारो दृश्यते पिपासुरिवाधुना। विश्वस्य सर्वेष्वपि देशेषु विनाशकयन्त्राणि आविष्कृतानि क्रियमाणानि च सन्ति। विकासविनाशयोरेक एव ककारनकारयोर्भेदो वर्तते। किमितेन विनाशकयन्त्राविष्करणेन? धिगीदृशम् आविष्करणम्। क्वचिदपि विस्फारितनयनाभ्याम् अवलोक्यतां, पुराकाले, यथा हाहाकाररवः श्रूयते स्म तथैवाधुनापि सर्वत्र आतंकवादिनाम् उग्रवादिनां कृत्येन श्रूयमाणो वर्तते ध्वनिः। एतैर्दनुजैर्जगदिदं दह्यमानमस्ति। दैत्या इमे न सुखं तिष्ठन्ति, न वान्यान् सुखिनो द्रष्टुं समुत्सहन्ते। अस्यां विषमपरिस्थितौ यदा कपोलपाणिना मया विचार्यते तदा एक एव मार्गो दृश्यते। प्रतीयते यद् कलिकरालकाले योगः एव महतीं भूमिकां निर्वोढुमस्ति क्षमः। अयं कपिलमुनिप्रदत्तो महर्षिपतंजलिव्यवस्थापितो योग एव विश्वशान्तये उपयोगी वर्तते। कुत इति जिज्ञायामुच्यते–

योगश्चित्तवृत्तिनिरोधः[1] इति यदुक्तं महर्षिणा तदाशयो ज्ञेयः। स चायमस्ति। क्षिप्तविक्षिप्तमूढैकाग्रनिरुद्धाख्याश्चित्तभूमयो भवन्ति। यासां पूर्ववर्तिन्यस्तिस्रो हेया मन्यन्ते। प्रश्नोऽयं समुद्भवति यत् केन चित्तवृत्तिनिरोधो भवेत्? तदुच्यते प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।[2] इमाः चित्तवृत्तयो निरोद्धव्याः। आसां निरोधेनैव परमशान्तिलाभः। एतासामेव प्रभावेण सर्वं पुण्यापुण्यं साधकेन मानवेन परस्परं राष्ट्रेन वा क्रियते। अतस्तूक्तं चित्तं नामोभयतो नदी, वहति पुण्याय वहति च पापाय। अर्थात् पुण्यपापकारिका एते चित्तवृत्तयो यावन्न निरुद्ध्यन्ते न तावन्मानवो राष्ट्रं वा लभते शान्तिम्। अशान्तोऽसौ अज्ञानवशात् दुःखदायिवस्तु सुखदायि मन्यमानस्तल्लाभाय प्रयतमानो दूयत एवेति नातिचित्रम्।

अधुना सम्पूर्णोऽपि संसारः विकासोन्मुखस्सन्नपि अस्तो व्यस्त इव दृश्यते। बहवो विकसिता अपि देशाः परराष्ट्रधनभूमिलोभिनो मिथः युध्यमाना दृश्यन्ते। परस्परं म्रियन्ते मार्यन्ते चेति विलोक्यतेऽनुदिनम्। अनेन किं लभ्यते? अहो! जीवनम् एतावदस्ति मूल्यहीनम्। धिगीदृशं जीवनम्! मान्याः परिषत्पतयः! अस्य कारणं योगाभाव एवास्ति। यावत् युक्ताहारविहारपरिज्ञानं न भविष्यति न तावद् विश्वशान्तिः स्थापिता भवितुमर्हति। महद् वैषम्यमधुना साक्षाद् दृष्टिपथमायाति। यथा कश्चित् दिवा शेते, कश्चित् रात्रौ जागर्ति। कश्चित् भक्ष्यं खादति, कश्चिच्चाभक्ष्यबुद्धिर्दुनुज इव वर्तमानो विलोक्यते। प्रायशश्चोच्यतेऽपि यादृशमन्नं भुज्यते यादृशं जलं पीयते तादृशमेव भवति चित्तं, अतः युक्ताहारविहारवानेव योगी शान्तिं लब्धुं समर्थो भवति।

यद्यपि दानवा न विरमन्ति स्वभावादिति सर्वोऽपि जनो जानात्येव। किन्तु यदि दैववशात् रजस्तमोगुणवर्धकाभक्ष्यापाकरणं मानवेन क्रियतां तदावश्यमेव योगोक्तसत्त्वगुणागमेन सर्वत्र शान्तिसमुद्भवः। इति मदीयो विमर्शः। महर्षिणा प्रोक्तं योगसूत्रे यत् आसां चित्तवृत्तीनां निरोधाय अभ्यासवैराग्ययोः भूमिका महती वर्तते। श्रुतमपि अस्माभिः श्रीमद्भगवद्गीतायां यत्

चंचलं हि मनः कृष्ण! प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।
किंच अभ्यासेन न तु कौन्तेय वैराग्येण च गृह्यते।[3]

हन्त महिषासुरबुद्धिः संसारो न वेत्ति सर्वमेतत् मुनिनोक्तम्। अतस्तु दूयमानो दृश्यते। दीर्घकालादरनैरन्तर्यासेवितोऽभ्यासो[4] न सर्वेषां कृते सुदुर्लभः, निरन्तरधनमानाप्तये निरतानां यततामेषाम्। एवमेव प्रकारेण वैराग्यमपि दुष्करमेवास्ति। दशी शतमीहते शती सहस्रम्, साहस्री लक्षमीहमानः तत्तल्लाभाय पुण्यापुण्यकर्मारभते। अतः अभ्यासवैराग्यविहीनानां यावद् योगोशिक्षा न दीयते न तावत् शान्तिसाम्राज्यं क्वचिदपि स्थापयितुं शक्यते। अभ्यासवैराग्याभावे एव वर्तमानयुगे सर्वत्र अशान्तिराज्यं दरिदृश्यते। परिवारे भ्रातॄणां , राजनीतौ नेतॄणाम्, समाजे विख्यातानाम् असन्तोषतया अतृप्तभावोत्कटत्वेन न सुखावभासोऽपि दृष्टिं नन्दयति। हे प्रभो! तव सृष्टिरियं मनोहरा यत्र सर्वोऽपि लब्धुं प्रयतते न प्रदातुमित्येव अशान्तेः कारणमस्ति। प्रतिवेशिना चीनेन नीचेन साकं यः सन्धिः 29 दिनांके अप्रैलमासस्य चतुःपंचाशदुत्तरैकोनविंशतितमे वर्षे कृतः, तस्य मूलाधारो योगशास्त्रमेवासीत्। यत्र योगशास्त्रस्य यमनियमादिषु परिगणितो यम एव बौद्धैः पंचशीलसिद्धान्तनाम्ना प्रचारितः, चीनोऽपि बौद्धानुयायीति मत्वा एष मार्गः समाश्रितः। अहिंसा अस्तेय ब्रह्मचर्यम् अपरिग्रहः एव आधुनिकव्याख्यानुसारं पंचशीलत्वमुपागताः एवं दर्शिताः।

1 परस्परं अखण्डतायाः सम्प्रभुतायाः सम्मानः करिष्यते।
2 नाक्रमणं परस्परं करिष्यते।
3 परस्परम् आन्तरिककार्येषु न हस्तक्षेपो विधास्यते।
4 सम्मानात्मकः परस्परं लाभात्मकश्च सम्बन्धो भविष्यति।
5 शान्तिपूर्णं सहास्तित्वं सम्मानयिष्यते।

बहूनि वर्षाणि यावत् सन्धिरयं भारतचीनयोर्मित्रताभूमिं दृढीकृतवानिति को न जानाति। मान्याः! तदानीन्तनैश्चिन्तकैस्तु योग एव शान्तिस्थापनायेति चिन्तितमिति मदीयो वक्तव्याशयः। भवतु नाम न परस्परं राष्ट्रयोः शान्तिवार्ता बहुधा कृतापि दुष्टेन चीनेन पाकेन च भारतीयभूमिलाभलोभवशात् किं किं प्रतिदिनं क्रियमाणमस्तीति न परोक्षमधुना। पंचशीलसिद्धान्तमंगीकुर्वतापि नीचेन चीनेन किं कृष्टमिति जानाति निखिलः संसारः। किन्तु सप्रणयं ब्रवीमि यत् योग एव तत्रापि यमनियमादिमयः एव सम्पूर्णेऽपि संसारे शान्तिं स्थापयितुमस्ति समर्थ इति घोषयामि।

रागद्वेषशून्येन परमोपकारिणा महर्षिणा पतंजलिना मन्ये संसारसंचालनायैव योगशास्त्रं व्यरचि। यावन्न विरागस्तावन्न शान्तिः। सन्तोषादनुत्तमः सुखलाभो भवति। अस्मिन्नेव शास्त्रे मानवजीवनं कथं केन दर्शनीयं भवेदित्युपदेशो दत्तो विद्यते। यावच्चित्तशन्तिर्न भविष्यति न तावद् देशे विदेशेष्वपि शान्तिसाम्राज्यस्थापना कर्तुं शक्यते।

योगेन चित्तस्य[5] शोधनं निरोधनमेव क्रियते, किन्तु सम्प्रति बहवो योगाचार्याः योगो रोगनिदानहेतुर्मन्यते, योगेन रोगोऽपाक्रियते, एतत् कृत्यपि योगस्य बहूद्देश्यत्वं साधयति। बहु सुन्दरमेतदाभाति। योगमार्गे येऽन्तराया व्याधिस्त्यानादयस्तेषां[6] दुःखादीनां विक्षेपसहभुवां[7] च परिशमनाय योगशास्त्रे बहव उपाया दर्शिताः सन्ति। अतस्तेषां समनुष्ठानेन महांल्लाभो भवति जनानाम्। मलिनचित्ताक्षालनाय मैत्री–करुणा–मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनतश्चित्तप्रसादनं[8] भवतीत्यपि महर्षिणा प्रोक्तमेवास्ति योगशास्त्रे। यदि जनो देशो वा इदमेव सूत्रमंगीकुर्यात् तदा तस्य रूपं दर्शनीयं भवेत्।

महर्षिणा पतंजलिना योगसूत्रे क्रियायोगः तपस्स्वाध्यायेश्वरप्रणिधानानि अत्र तपःपरिभाषा द्वन्द्वानां सुखदुःखादीनां सहनं तपः, स्वशास्त्राणामनुशीलनं स्वाध्यायः, सर्वकर्मार्पणमीश्वराय ईश्वरप्रणिधानमिति कल्पितमस्ति। अनेनापि संसारे शान्तिस्थापना भवति। पश्यन्तु भवन्तः अस्माकं प्रतिवेशी किं किं असह्यं दुःखं ददाति, कदाचित् सुप्ते सैन्यशिविरे गुलिकावृष्टिं करोति, कदाचित् कमपि जाधवं देशभक्तं गुप्तचरं समुद्घोष्य यातनां ददानो मोदं लभते। अहो! भारतीयानामस्माकं हृदयं विदीर्यत इवेति को न जानाति, वयं भारतीयाः तपः कुर्मः। इदं ज्ञानं योगशास्त्रस्य क्रियायोगत्वमेव प्रमाणयति। यदा भारतं मैत्रीहस्तं प्रसारयति, संसारः प्रसीदति मैत्रीभावनया किन्तु अयं दुःखमवाप्नोति। संसारेणास्य उपेक्षा कृता, येनास्य बुद्धिशुद्धिरभूत्। भारतदेशोऽस्माकमस्मिन् दैवप्रकोपाकुले करुणा दर्शिता किन्तु पयःपानं भुजंगानां केवलं विषवर्धनम् इति चरितार्थीकुर्वता मूढेन तेन दानवत्वं दर्शितं दर्श्यते चेति पश्यति लोकः। अस्मिन् सन्दर्भे भारतेन मैत्रीकरुणमुदितोपेक्षाभावनया वर्तते। अयं योगमार्गः।

भगवता भवता पतंजलिना साधनपादे प्रोक्तं यत्

योगांगानामनुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।[10]

अर्थात् यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनाम्[11] अनुष्ठानेन विवेकख्यातिपर्यन्तं ज्ञानदीप्तिर्भवति अशुद्धिरपि क्षीयते। अत्र अहिंसासत्यास्तेयापरिग्रहाणां यमानां[12] ज्ञानेन परिपालनेन सर्वमपि जीवनं पुण्यावहं भवति। केवलमेकमेव सूत्रमिदं कश्चिदपि मानवो देशो वा सम्यग्जानाति तेनैव सर्वविघ्नविनाशाद् भवति शान्तिसाम्राज्यस्थापना सर्वत्र। अहिंसाप्रतिष्ठियां तत्सन्निधौ वैरत्यागः।[13] सत्यप्रतिष्ठियां क्रियाफलाश्रयत्वम्।[14], अस्तेयप्रतिष्ठियां सर्वरत्नोपस्थानम्।[15]एवमेव प्रकारेण शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानानां नियमानमनुष्ठानेन[16] महान् दर्शनीयो भवति लाभः। यथा सन्तोषः परमं सुखम्। साईं इतना दीजिये जामे कुटुम समाय। मैं भी भूखा ना रहूं, साधु न भूखा जाय। इत्यस्य भावना प्रतिजनं प्रतिदेशं स्थापनीया वर्तते। एतत् केवलं योगशास्त्रपरिशीलनेन तदनुष्ठानेन सम्भविष्यति। महाव्रताख्या यमाः योगशास्त्रसम्मताः अत्यन्तमेव वैश्विकशान्तिसंस्थापनार्थं प्रासंगिका उपयोगिनश्च सर्वैरपि मन्यन्ते।

अयि विविधशास्त्राब्धिचित्तवृत्तयो महानुभावाः! नाहं वदामि यत् योगः केवलं साधूनामेव धनमस्ति। स्मरामि द्रौपदीवचनमपि शमेन सिद्धिं मुनयो न भूभृतः।[17] यत्र योगेश्वरः श्रीकृष्णः यत्र योगीश्वरो भगवान् शिवः ध्यानावस्थिततद्गतेन मनसा पश्यन्ति ये योगिनः स प्रभुः एते योगानुसारमेव सृष्टिं रचयन्ति, पालयन्ति यथासमयं संहरन्तीति विजानीमः श्रुतेन प्रमाणेन वयम्। महात्मना गान्धिना अपि शस्त्रद्वयमंगीकृतमासीत् सत्यम् अहिंसा च। यस्य परिपालनं तेन आजीवनं कृतं देशस्य स्वतन्त्रतायां महद् योगदानमपि कृतम्। येन राष्ट्रपितेत्युपाधिना सम्पूज्यते। बाबारामदेवेनापि सम्पूर्णे संसारे शान्तिसंस्थापनाय योगविद्या प्रदीयते। येन स्वस्था मानवाः स्वस्थराष्ट्रविकासाय नूनं यतिष्यन्त इति मम द्रढीयान् विश्वासो वर्तते। तेषामेव सक्रियत्वेन भारतसर्वकारस्य योगसन्मानेनेन विश्वे जूनमासस्य एकविंशतिदिनांके योगदिवसो मान्यते। अवश्यमेकस्मिन् दिने विश्वशान्तिसंस्थापने योग एव शक्त इति सर्वोऽपि ज्ञास्यति। अतः समुपहरन् स्ववक्तव्यमहं वच्मि यत् यस्मिन् ब्रह्माण्डे योगो विलसति, यमाश्रित्य सर्वोऽपि व्यवहारोऽनुष्ठीयते स एव विश्वशान्तये उपयोगी वर्तत इति निगदन् किं च योगः कर्मसु कौशलमित्यपि स्मरन् स्वकीयां वाणीं समाप्नोमि।

जयतु योगो जयन्तु योगिनः।

सन्दर्भाः

1 1/2
2 1/6
3 श्रीमद्भगवद्गीता 6/35
4 1 /12
5 रामभद्रदीक्षितप्रणीतपतंजलिचरिते ।
6 1/30
7 1 /31
8 1/33
9 2/1
10 2 /28
11 2/29
12 2/30
13 2/35
14 2/36
15 2/37
16 2/33
17 किरातार्जुनीयम्।

डॉ अरविन्द कुमार तिवारी

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज़, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# ‘मनोगतम्’ - 48

प्रसारण-तिथिः - 30-09-2018



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाःदेशवासिनः! नमस्कारः। कदाचिदेव भवेद् कश्चन भारतीयः यो हि अस्मदीयानां सशस्त्र-बलानां सैनिकानां कृते गौरवं नैवानुभवेत्। प्रत्येकमपि भारतीयः, भवतु नाम सः कस्यचन क्षेत्रस्य, जातेः, धर्मस्य,पथः,भाषायाः वा - अस्मदीयान् सैनिकान् प्रति निज-प्रसन्नतां प्रकटयितुं समर्थनञ्च प्रदर्शयितुं सर्वदैव तत्परो भवति। गतदिने एव भारतस्य सपाद-शत-कोटिः देशवासिनः, पराक्रमपर्व आयोजितवन्तः। वयं वर्ष-द्वय-पूर्वं विहितं surgical strike-इति शस्त्र-निपातनं स्मृतवन्तः, यदा अस्मदीयाः सैनिका: अस्माकं राष्ट्रमभिलक्ष्य आतङ्कवाद-व्याजेन छद्म-युद्ध-निरतान्धृष्टान् सम्यक् उत्तरितवन्तः। देशस्य नाना-स्थानेषु अस्मत्-सशस्त्र-बलानि प्रदर्शनीः आयोजयेयुः येन देशस्य समधिकाः नागरिकाः विशेषेण युव-जनाः नूनमिदम् अवगच्छेयुः यत् अस्मदीया शक्तिः नाम किमस्ति ? कियन्तो वयं क्षमाः ? तथा च, केन प्रकारेण अस्माकं भटाः निज-प्राणान् पणीकृत्य अस्मान् देशवासिनो रक्षन्ति। पराक्रम-पर्व-सदृशः दिवसः अस्मदीय-सशस्त्र-सेनानां गौरवपूर्ण-रिक्थ-विषये यूनः स्मारयति, तथा च, देशस्य एकताम् अखण्डताञ्च सुनिश्चेतुं अस्मान् प्रेरयति। अहमपि वीराणां भूमौ राजस्थाने जोधपुरे एकस्मिन् कार्यक्रमे सहभागित्वमावहम्, साम्प्रतमिदं सुनिश्चितं यद् अस्माकं सैनिकाः तान् सर्वानपि समीचीनं प्रत्युत्तरिष्यन्ति ये हि अस्मदीये राष्ट्रेऽस्मिन् शान्तेः उन्नतेश्च परिवेशं प्रणाशयितुं प्रयतिष्यन्ते। वयं शान्तौ विश्वसिमः तथा चैनां प्रवर्धयितुं प्रतिबद्धाः स्मः, किञ्च सम्मान-सामञ्जस्यं कृत्वा राष्ट्रस्य च सम्प्रभुतां पणीकृत्य न कदाचिदपि। भारतं सर्वदैव शान्तिं प्रति वचनबद्धं समर्पितञ्च अवर्तत। विंशतौ शताब्दे विश्वयुद्ध-द्वये अस्माकं लक्षाधिकाः सैनिकाः शान्तिं प्रति नैजं सर्वोच्चं बलिदानं कृतवन्तः तथा चेदं बलिदानं तदानुष्ठितं, यदा आभ्यां युद्धाभ्यां न वयं साक्षात्-सम्पृक्ताः आस्म:। न वयं कदापि कस्यचन भूमेः अभिलाषिणः समभवाम। एषासीत् शान्तिं प्रति अस्मदीया प्रतिबद्धता। कतिपय-दिनेभ्यः प्रागेव सेप्टेम्बर-मासे त्रयोविंशे दिने वयं इस्राइलस्य Haifa-युद्धस्य शत-वर्ष-पूर्तौ सत्यां मैसूर-हैदराबाद-जोधपुर-शक्ति-समूहानां अस्मदीयान् वीर-सैनिकान् अस्मराम, ये हि आक्रान्तृभ्यः Haifa-क्षेत्रं मुक्तमकुर्वन्।अयमपि शान्ति-दिशि अस्माकं सैनिकैः समाचरितः अन्यतमः पराक्रम एवासीत्। अद्यत्वेऽपि संयुक्त-राष्ट्र-संघस्य पृथक्-पृथक् शान्ति-संधारक-बलानां कृते भारतं सर्वाधिक-सैनिक-प्रेषकेषु देशेषु अन्यतमोऽस्ति। दशकेभ्यः अस्माकं वीर-सैनिकाः नीलं शिरस्त्राणं परिधाय विश्वस्मिन् विश्वे शान्तिं सन्धारयितुं महत्त्वाधायिनीं भूमिकां निरवहन्।

मम प्रियाः देशवासिनः, नभसः कथा तु अनुपमा एव भवति, नात्र किमपि आश्चर्यं यन्नभसि निज-शक्तिं प्रदर्श्य भारतीय-वायुसेनादेशवासिनां प्रत्येकमपि ध्यानमाकर्षयत्,सुरक्षा-विषये अस्मान् आश्वासयत्। गणतन्त्र-दिवसीय-समारोहावसरे जनाः सामूहिक-प्रयाणस्य यत् प्रदर्शनम् अतितराम् आतुरतया अवलोकयितुं समुत्सुकाः भवन्ति, तेष्वन्यतमम् अस्ति Fly Past-इति नभसि वायुयानानां सहभागित्वं यस्मिन् अस्मदीया वायुसेना विस्मयकराणि कौतुक-कार्याणि कृत्वा निज-शक्तिं प्रदर्शयति। ओक्टोबर-मासे वयं ‘वायुसेना-दिवस’ मायोजयामः। विगते शताब्दे षड्भिः विमान-चालकैः ऊनविंशतिना च सैनिकैः सार्धं लघु-समारम्भेण समेधमाना अस्मदीयैषा वायुसेना साम्प्रतम् एकविंश-शताब्दस्य साहसिकतमासु शक्तिशालिनीषु च वायुसेनासु अन्यतमा परिगण्यते। नूनम् एषास्ति स्मरणीया एका यात्रा। देशार्थं निज-सेवा-प्रदायिनां सर्वेषां वायुसेना-योद्धॄणां तेषाञ्च कुटुम्बानां कृतेऽहं हार्दिकम् अभिनन्दनम् अर्पयामि। विगते शताब्दे सप्तचत्वारिंशे वर्षे, यदा पाकिस्तानस्य आक्रमणकारिणः अप्रत्याशितम् आक्रान्तुमारभन्त, तदा एषैव वायुसेनासीत् या नाम श्रीनगरम् अस्मात् आक्रमणात् संरक्षितुं सुनिश्चित्य भारतीय-सैनिकान् उपकरणानि च युद्ध-क्षेत्रं यावत् काले एव प्रापितवती। इयमेव वायुसेना विगते शताब्दे पञ्च-षष्टि-तमे वर्षेऽपि अरीन् सम्यक्तया पराभूतवती। विगते शताब्दे एकसप्ततितमे वर्षे सञ्जातं बांग्लादेशस्य स्वतन्त्रता-युद्धं को नाम नैव जानाति ? विगते शताब्दे नवनवति-तमे वर्षे करगिल-क्षेत्रे अवैध-प्रवेशकानां नियन्त्रणम् अपाकर्तुमपि वायुसेनायाः भूमिका महत्त्वाधायिनी आसीत्। Tiger Hill-इति क्षेत्रे शत्रूणाम् आस्थानकेषु अहर्निशं प्रक्षेप्यास्त्रैः आक्रम्य वायुसेना एषा तेषां बलं धूलिसात्कृतवती। भवन्तु नाम सुरक्षा-साहाय्य-कार्याणि आहोस्वित् आपदा-प्रबन्धन-कर्माणि ! अस्मदीयाः वायुसैनिकाः सर्वदैव तत्पराः भवन्ति। तेषां प्रशंसार्ह-कार्याणां कृते देशोऽयं कृतज्ञोऽस्ति। झञ्झावात-व्रात्या-प्रभञ्जन-जलपूर-वनाग्नि-सदृशीं प्राकृतिकापदं प्रतीकर्तुं देशवासिभ्यश्च साहाय्यं प्रापयितुं तेषां समर्पण-भावः सर्वदैव अद्भुत आसीत्। देशस्य gender equality-इति स्त्री-पुंसोः समानतां सुनिश्चेतुं वायुसेना उदाहरणं स्थापितवती, तथा च, स्वीयानि प्रत्येकमपि विभागस्य द्वाराणि देशस्य दुहितॄणां कृते अनावृतानि व्यदधात्। अधुना वायुसेना महिलानां कृते अल्प-कालिक-नियुक्त्या सार्धं स्थायि-नियुक्तेः विकल्पमपि प्रावधत्ते, एतद्-विषयिणी च घोषणा,ऐषमः ओगस्ट-मासे पञ्चदशे दिनाङ्के रक्त-दुर्गस्य प्राचीरेभ्यः मया एव कृतासीत्। भारतं सगर्वं कथयितुं शक्नोति यत् भारतस्य सेनानां सशस्त्र-बलेषु पुरुष-शक्तिरेव नैव, स्त्री-शक्तिरपि तावन्-मात्रिकं योगदानं विदधाति। नारी सशक्तनु अस्त्येव, सम्प्रति सशस्त्रमपि सञ्जायते।

मम प्रियाः देशवासिनः! विगतेषु दिनेषु अभिलाष-टोमी (AbhilashTomy)-इति अस्मदीय-नौसेनायाः अन्यतमाधिकारी जीवन-मृत्योः मध्ये युद्ध्यति स्म। अशेष-देशःचिन्तितः आसीत् यत् केन प्रकारेण टोमी-महोदयः संरक्षितो भवेदिति। किमु भवन्तो जानन्ति यद् अभिलाष-टोमी-वर्यः साहसी वीरश्चाधिकारी अस्ति ? सः एकाकी कस्यचन आधुनिक-प्रविधेः रहितां लघु-नौकाम् आरुह्य विश्व-भ्रमणस्य कृते प्रयातः प्रथमः भारतीयः आसीत्। विगतेभ्यः अशीति-दिनेभ्यः असौ दक्षिण-हिन्द-महासागरे Golden Globe Race-इति वैश्विक-सुवर्ण-स्पर्धायां सहभागित्वं निर्वोढुं सागरे निज-गतिं सन्धारयन् अग्रेसरति स्म, परञ्च भीषण-सामुद्रिक-झञ्झावातेन कष्टाकीर्णः सन् सः काठिन्यम् अन्वभवत्, परञ्चभारतस्य नौसेनायाः वीरोऽयं समुद्र-मध्येअनेक-दिनानि यावत् संघर्ष-निरतः सन् युद्ध्यति स्म। सः सागरे पेय-जलम् अशनं विनैव जीवनार्थं युद्ध्यति स्म। परञ्चजीवनार्थं पराभवं नैव स्वीकृतवान्। साहसस्य, संकल्प -स्य, शक्तेः, पराक्रमस्य चाद्भुतमुदाहरणम् ! प्रकतिपय-दिवसेभ्यः प्राक्, अभिलाष-वर्यः समुद्रात् समुद्धृत्य बहिः आनीतः, तदाहं तेन साकं दूरभाषेण सम्भाषितवान्। पूर्वमपि तमहं अमिलम्। एतादक्-सङ्कटात् समुद्धरणानन्तरमपि तस्य समुत्साहः साहसञ्च अद्भुतमासीत्, पुनरेकवारम् एतादृक्-पराक्रममनुष्ठातुं स्वीय-संकल्प-विषये सः मां बोधि- तवान्। देशस्य युव-सन्ततेः कृतेऽसौ प्रेरणा-स्रोतस्त्वेन वर्तते। अभिलाष-टोमी-वर्यस्य उत्तम-स्वास्थ्यस्य कृतेऽहं प्रार्थये, तथा च, तस्य साहसं,पराक्रमः,संकल्प-शक्तिः संघ- र्षविजययोश्च कृते तस्य या अदम्या शक्तिः, सा नूनं युव-जनान् प्रेरयिष्यति।

मम प्रियाः देशवासिनः, अस्माकं देशे न तादृशः कश्चन दिवसः यस्य किञ्चित् माहात्म्यं न स्यात्, सर्वस्मिन्नपि दिने किमपि किमपि पर्व भवति,हिन्दु- स्थानस्य कस्मिञ्चिदपिकोणे किमपि किमपि प्रचलत्येव। नातिचिरं वयं गणेशो- त्सवमायोजितवन्तः, अपि चेतः परं ‘दुर्गा-पूजायाः’ सज्जताः आरप्स्यन्ते। तदनु ‘दीपा -वल्ल्याः’ प्रकाश-चाक-चिक्यम् अवलोकयितुं शक्ष्यते। एतेषाम् उत्सवानामायोजनार्थं जनाः अवकाशनिरताःअपि भवन्ति। यद्यपि वयं परिपार्श्ववर्तिनः तादृशान् अपि जनान् पश्यामः ये हि उत्सवावसरेऽपि निज-नियुक्त-कार्याणि कुर्वन्ति। निज-कुटुम्बा-वश्यकताः, पारिवारिकाणां प्रसन्नताः, सुखानि दुःखानि च परिभावयितुं उत्सवेषु च सह- भागित्वस्य न्यूनान् एव अवसरान् एते लभन्ते। भवतु नाम धारासार-वृष्टिः वा उग्रतमः निदाघः, यत्र कुत्रापि किमपि परिदेवनं वा कष्टं जायते चेत्ते सर्वप्रथमम् अस्माकं कृते तत्र समुपस्थिताः भवन्ति। वयं तान् पश्यामः, परञ्च एतान् विषयान् अधिकृत्य वयम् अवधानं नैव दद्मः - तथा चैते सन्ति अस्मदीयाः वीराः रक्षि-कार्मिकाः। अद्याहं गौरव- पूर्ण-रीत्या अस्मदीयान् वीरान् रक्षिकर्मिणः स्मरामि, तथा च, शनैः शनैः अशेष-देशोऽद्य- पि एवम् अभ्यसेदिति वाञ्छामि। वयं देशवासिनः तान् सगौरवं सर्वदैव स्मरेम। विभि -न्नराज्येषु केन्द्रीय-रक्षिबलेषु च कार्यनिरतान् एतान् लक्षशो रक्षिकार्मिकान् अभिवन्दे, युगपदेव तेषां कुटुम्ब-जनेभ्योऽपि प्रणमामि। देशार्थं स्वीयं सर्वस्वमपि समर्पितानां रक्षि-कर्मिणां सम्माननार्थं प्रतिवर्षम् ओक्टोबर-मासे एकविंशतौ दिने ‘आरक्षि-स्मृति-दिवसः’ आयोज्यते। विगते शताब्दे ऊनषष्टि-तमे वर्षे ओक्टोबर-मासेएकविंशतौ दिनेभारत-चीन-सीम्नि गोलिका-प्रहारैः अस्मदीयाः दश रक्षि-कर्मिणः हुतात्मनो जाताः। दिवसोऽद्य- यं तेषामेव स्मृतौ आमान्यते। किं भवन्तः जानन्ति यत् स्वाधीनतायाः प्राप्तेः अनन्तरं साम्प्रतं यावत् प्रायेण पञ्च-सहस्रं रक्षि-कार्मिकाः - देशस्य, समाजस्य, सामान्य-जनाना- ञ्चरक्षार्थं नैजान् प्राणान् अर्पितवन्तः। अहं देशस्य तेभ्यो महद्भ्यः जनेभ्यः, तेषाञ्च सर्वोच्च-बलिदानाय श्रद्धाञ्जलिम् अर्पयामि, अपि च तेषां परिजनानां समर्पणेऽहमस्मिन् बहुमूल्य-योगदानार्थमपि देशः गौरवमनुभवति। भारतस्य शान्ति-सुरक्षयोः कृते अस्मदी- याः रक्षिकर्मिणः विपरीत-परिस्थितिष्वपि प्रत्येकमपि समाह्वानानि सम्मुखीकुर्वन्तः निजकर्तव्यानि निभालयन्ति। भवन्तु नाम ते आतंकवादं पराजेतुं कर्तव्य-निरताः जम्मू- कश्मीररक्षिवीराः वा अर्धसैनिकबलानां भटाः वा छत्तीसगढ़ क्षेत्रे नक्सलवादिनः सम्मुखी- कुर्वन्तः रक्षिणः। अपराध-नियमनस्य विषयो वा भवेत्, परिवहन-सम्भालनस्य दायित्वं वा स्यात्, आहोस्वित् कुम्भ-मेला स्याद् वा, भगवतो जगन्नाथस्य यात्रा भवेत्, वाअमरनाथयात्रा, उताहोसबरीमालायात्रा स्यात्, वा मुहर्रम-सामूहिक-प्रयाणं भवेत्। अस्य देशस्य किञ्चिदपि धार्मिकं पर्व एतादृशं नैव भवति, कानिचिद् वा एतादृग्नि धार्मिका-योजनानि नैव भवन्ति, यत्र कोटिशःश्रद्धालूनां साहाय्यस्य समाह्वान-पूर्णानि कार्याणि एते रक्षिणः निपुणतया नैव निभालयन्ति। अस्माकं मध्ये लक्षशोऽविख्याताः नायकाः सन्ति ये न केनापि प्रोत्साह्यन्ते, येषां पृष्ठं न केनापि समातोद्यते,न कदापि कश्चन तान् पृच्छति यत् भ्रात ! यातायातं सम्भालयितुं कियतीः होराः पर्यन्तं स्थितोऽसि ? वर्षायां क्लिन्नोऽपि कार्यं करोषि ? किं रुग्णतायाः भीतिः नैवास्ति ? भवन्तः एतद् ज्ञात्वा आश्चर्यमनुभविष्यन्ति यत् अस्मदीयाः रक्षिणः चीन-नेपाल-भूटान-बांग्लादेशैः सम्पृक्तायाः प्रायेण सार्ध-द्वादश-शत-किलोमीटर-दीर्घायाःसीमायाः सुरक्षायै सर्वाग्र- गामिनो वर्तन्ते। एतेषु ITBP- इति भारत-तिबेट-सीम-रक्षिणोऽपि समाविष्टाः सन्ति ये हि ओक्टोबर-मासे चतुर्विंशे दिनाङ्के स्वीयं स्थापना-दिवसमायोजयिष्यन्ति। अवसरे- ह्यस्मिन् अहं तेभ्योऽपि शुभं कामये। ओक्टोबर-मासे एकविंशे दिनाङ्के आरक्षि-स्मार- कम् उद्घाटयिष्यामि यत्र हि देशवासिनः अस्माकं सुरक्षायां संलग्नान् रक्षिकर्मिणःप्रति निज-कृतज्ञतामभिव्यञ्जयितुं शक्ष्यन्ति। नैकवारं अस्मदीयाः रक्षिणः असामाजि- कतत्वानि सरलतया निवारयितुं शक्नुवन्ति परञ्च समाजस्य मध्ये स्वीयां छविं प्रति- ष्ठापयितुं तेऽद्यानारतं संघर्षमनुतिष्ठन्ति। अहं भारतस्य नागरिकान् निवेदयामि-अस्माकं रक्षिबलम् अस्मदीयायै सुरक्षायै कियन्मात्रिकं प्रयतते, वयमपि तेषां कृते किञ्चित् तादृशं करवाम। यदि केनापि रक्षिबलाधिकारिणा वा रक्षिणा साकं सञ्जाताः भवतां सुखदाः अनुभवाः सन्ति चेत्, अवश्यं सामाजिक-सञ्चार-माध्यमेषु स्वीयैः परिवार-मित्रैः साकं तान् पौनःपुनिकं संविभाजयेयुः,जनान् विज्ञापयेयुः, तथा च, प्रत्येकमपि नागरि- कस्य कदाचित्तु रक्षिणा साकं भद्रानुभवः सञ्जातः एव स्यात्। वयं नूनं अस्माकं रक्षिकर्मिणोऽभिलक्ष्य गौरवमनुभवेम ये हि विनैव क्लान्तिं, विनैव विश्रमं, सधैर्यञ्च निज-कर्तव्यानि निभालयन्ति, येन देशवासिनः ससुखं जीवितुं शक्नुयुः।

मम प्रियाः देशवासिनः, ओक्टोबर-मासस्य द्वितीय-दिनं - अस्मदीय-राष्ट्र- स्य कृते अस्य दिवसस्य किं महत्वमस्तीति, प्रत्येकं बालोऽपि जानाति। ऐषमः ओक्टो- बर-मासस्यद्वितीय-दिनस्य अपरमेकं वैशिष्ट्यमस्ति। इतः परं वयं वर्ष-द्वयं यावत् महात्मनः गान्धिनः सार्धैक-शत-वर्षीयायाः जयन्त्याः निमित्तार्थं विश्वस्मिन्नपि विश्वे अनेक-विधान् कार्यक्रमान् आयोजयिष्यामः। महात्मगान्धिनः विचाराः कृत्स्नमपि विश्वं प्रेरितवन्तः। Dr. Martin Luther King Junior §çÌ ßæ Nelson Mandela-सदृश्यो महत्यो विभूतयो वा भवन्तु, सर्वेऽपि गान्धि-महात्मनो विचारेभ्यः शक्तिमवाप्नुवन्, तथा च, निज-नागरिकाणां समानता-सम्मानयोः अधिकारं प्रापयितुं ते सुदीर्घ-संघर्षम- नुष्ठातुम् अशक्नुवन्। अद्यतने ‘मन की बात’-प्रसारणे, अहं भवद्भिः साकं पूज्य-बापू-चरणस्य अपरमेकं महत्वपूर्ण-कार्यं चर्चितुं वाञ्छामि यद्धि अधिकाधिकाः देशवासिनः नूनम् अवगच्छेयुः। विगते शताब्दे एकचत्वारिंशत्तमे वर्षे,महात्मगान्धी रचनात्मक-कार्यक्रम-रूपेण काँश्चन

विचारान्लेखितुमारभत। अनन्तरं विगतेशताब्देपञ्चचत्वा- रिंशत्तमेवर्षे, यदा स्वतन्त्रता-संग्रामः तीव्रतरः जातः तदा सः तेषां विचाराणां परिष्कृ- तां प्रतिं सज्जीकृतवान्। पूज्य-बापूः कृषकाणां, ग्रामाणां, श्रमिकाणाञ्च अधिकाररक्षाम्, स्वच्छताम्, शिक्षायाः प्रसार-सदृशान् चानेक-विध-विषयान् अभिलक्ष्य निज-विचारान् देशवासिनां सम्मुखम् उपास्थापयत्। इदं हि गान्धि-चार्टर-(Gandhi Charter)-इति गान्धि-समुद्घोणापत्रमपि निगद्यते। पूज्यबापूः लोक-संग्राहकः आसीत्। जनैः साकं संयोजनम्, जनानाञ्च संयुतिकरणमिति-बापू-चरणस्य विशेषतासीत्, इदन्तु तस्य स्व-भावे एवासीत्। इयं हि तस्य व्यक्तित्वस्य सर्वोत्कृष्टा अनुपमा च विशेषता सर्वैरपि अनुभूता। सः प्रत्येकमपि जनम् अन्वभावयत् यत् सः देशस्य कृते सर्वाधिकं महत्व- पूर्णः नितराञ्च आवश्यकः अस्ति। स्वतन्त्रता-संग्रामे तस्य उत्कृष्ट-योगदानमिदमेव आसीत् यत् सः एतं व्यापक-जनान्दोलनं व्यदधात्। स्वतन्त्रता-संग्रामस्य आन्दोलने महात्म-गान्धिनः आह्वानमाधृत्य समाजस्य प्रत्येकमपि क्षेत्रस्य, वर्गस्य च जनाः आत्मानं समर्पितवन्तः। बापू-वर्यः अस्मभ्यं सर्वेभ्यः प्रेरणादायकं मन्त्रं प्रादात् यो हि प्रायेण, गान्धि-महात्मनः सिद्ध-यन्त्रत्वेन ज्ञायते स्म। एतदर्थं गान्धि-महात्मना प्रोक्त- मासीत्, 'अहं भवद्भ्यः युक्तिमेकां ददामि, यदा-कदाचिदपि, भवन्तः सन्देह-सन्दोहेन अभिभूताः वा भवताम् अहम्-भावः भवत्सु अधिकरोति, तदा युक्तिमेनां प्रयुङ्ध्वम्, यं निर्धनतमं निर्बलतमञ्चजनं भवान् अपश्यत्,तस्याकृतिं स्मृत्वा निजान्तःकरणं पृच्छतु यत् यं पद-क्षेपं कर्तुं भवान् विचारयति, सः तस्य जनस्य कृते कियान् समुपयोगी भविष्यति ? किन्तेन, सः लाभान्वितो भविता ? किं तेन सः निज-जीवनं भाग्यञ्च नियन्तुं शक्ष्यति ? अर्थात् किं तेन ते कोटि-कोटि-जनाः स्वराज्यमधिगन्तुं शक्ष्यन्ति, येषां उदराणि क्षुधा-व्याकुलानि सन्ति, आत्मा चातृप्तश्चास्ति। तदा भवन्तः अवगमिष्यन्ति यद् भवतां सन्देहाः अपाकृताः सन्ति,अहंकारश्च विगलितो जातः इति।'

मम प्रियाः देशवासिनः, गान्धि-महात्मनः एषा युक्तिः अद्यत्वेह्यपि तावती एव महत्वपूर्णास्ति। अद्यत्वे देशे समेधमानः मध्यम-वर्गः, समेधमाना च तेषाम् आर्थिकी शक्तिः, संवर्धमाना च क्रयक्षमता, किं वयं यत्किमपि क्रेतुं यामस्तदा क्षणं यावत् पूज्य-बापूं स्मर्तुं शक्नुमः ! किं पूज्य-बापू-वर्यस्य तामुक्तिं स्मर्तुं शक्नुमः ? किं वयं वस्तूनां क्रयावसरे विचारयितुं शक्नुमः यदहं यत् वस्तु क्रीणामि, तेन मम देशस्य कस्यचित् नागरिकस्य लाभो भविता ? कस्यचनाननं प्रसन्नं भविष्यति ? को नाम भाग्यशाली भविता यस्य प्रत्यक्षं वा अप्रत्यक्षं, भवतः क्रयेण लाभो भविता ? तथा च, निर्धनतमस्य लाभो भविष्यति चेत्, मम प्रसन्नता अत्यधिका भविता। गान्धि-महात्म- नः एनां युक्तिं स्मरन्तः आगम्यमानेषु दिनेषु यदापि वयं किञ्चित् क्रीणेम, गान्धिमहात्मनः सार्धैक-शततमां जयन्तीमायोजयामस्तदा नूनं वयं परिभावयेम यद् अस्माकं प्रत्येकमपि क्रयजातं कस्यचन देशवासिनः किञ्चिद् भद्रत्वाय एव स्यात्, एतेष्वपि ये निज-स्वेद-कणान् प्रस्तावितवन्तः, ये निज-धनं विनिवेशितवन्तः, ये स्वीय-प्रतिभां प्रयुक्तवन्तः, ते नूनं किञ्चित्-किञ्चिदपि लाभजातमवाप्नुयुः। एषैव आसीत् गान्धिनः युक्तिः, अयमेवासीत् गान्धिनः सन्देशः तथा चाहं विश्वसिमि यत् यो हि निर्धनतमः दुर्बलतमश्च जनः, तस्य जीवने भवतां लघुरपि पदक्षेपः बृहन्तं परिणाम- मानेतुम् अर्हति।

मम प्रियाः देशवासिनः, यदा गान्धि-चरणः अवोचत् यत् स्वच्छताम् आचरि- ष्यति चेत् स्वतन्त्रता अवाप्स्यते। स्यात् सः नैव जानाति स्म यत् कथमिदं सम्भवि- ष्यतिङ्क परञ्चैतत् सम्पन्नम्, भारतं स्वतन्त्रतामवाप्नोत्। एवंरीत्या सम्प्रति अस्मान् इदं प्रतीयते यत् ममामुना कार्येण अपि देशस्य आर्थिकोन्नतौ, आर्थिक-क्षमीकरणे,निर्ध- नताविरोधिनि संघर्षे, निर्धनाय शक्ति-प्रदाने च मम बृहद्-योगदानं भवितुमर्हति तथा चाहम् अवगच्छामि यत् अद्यतने युगे इयमेव परमार्थेन सत्या देशभक्तिरस्ति, अयमे- व पूज्य-बापू-वर्याय कार्याञ्जलिः वर्तते। यथा- विशेषावसरेषु खादी-हस्तवेमोत्पादान् क्रेतुं नूनं विचारयेयुः,एवं हि अनेकेभ्यःतन्तुवायेभ्यः साहाय्यं प्रापयितुं शक्ष्यते। कथ्यते यत् श्रीलाल-बहादुर-शास्त्री पुरातनानां जीर्ण-शीर्णानामपि खादी-वस्त्राणां सन्धारणं करो- ति स्म यतोहि तत्र कस्यचन श्रमः निगूढोह्यस्ति। सः कथयति स्म यत् एतानि सर्वाणि खादीवस्त्राणि अतितरां श्रमेण निर्मितानि सन्ति - एतेषां प्रत्येकमपि सूत्रं समुपयोक्त- व्यम्। देशेन साकं प्रसक्तिः देशवासिनः प्रति च प्रेम-भावः लघु-कायस्य अस्य महा-मानवस्य प्रत्येकमपि नाडीषु प्रवहतः स्म। दिन-द्वयानन्तरं पूज्य-बापू-वर्येण साकमेव वयं शास्त्रि-महोदयस्यापि जयन्तीम् आयोजयिष्यामः। शास्त्रि-महोदयस्य नाम-श्रवण-पुरस्सरं अस्माकं भारतवासिनां मनस्सु असीम-श्रद्धा-भावः समुद्भवति। तस्य सौम्य-व्यक्तित्वं प्रत्येकमपि देशवासिनं गौरवाप्लावितं विदधाति।

श्रीलाल-बहादुर-शास्त्रिणः इयं विशेषतासीत् यदसौ बहिस्तः अतितरां विनम्रः प्रतीयते स्म परन्तु आभ्यन्तरमसौ शिलावत् दृढ-निश्चयी आसीत्। 'जयतु युवा जयतु कृषकः' इत्ययं समाघोषः तस्य विराट्व्यक्तित्वस्य अभिज्ञानात्मकः। राष्ट्रं प्रति तस्य निःस्वार्थ-तपस्यायाः प्रतिफलमिदं यत् प्रायेण सार्धैक-वर्षीये संक्षिप्ते कार्यकाले, असौ देशस्य युवकान् कृषकान् च सफलता-शिखरमारोढुंमन्त्रं प्रादात्।

मम प्रियाः देशवासिनः, अद्य वयं यदा पूज्य-बापूं स्मरामस्तदा इदं सुतरां स्वाभाविकं यत्स्वच्छता-विषयं विना स्थातुं नैव शक्नुमः। सेप्टेम्बर-मासे पञ्चदशे- ह्यह्नि 'स्वच्छता एव सेवा' इत्यभियानमारब्धम् । कोटिशो जनाः अमुना अभियानेन संयुताः जाताः, अहमपि सौभाग्यमवाप्नवं यत् दिल्ल्याः अम्बेडकर-विद्यालये बालैः साकं स्वच्छतायै श्रमदानं कुर्यामिति। अहं तं विद्यालयं गतवान्, यस्य आधारशिला स्वयं पूज्यबाबा-साहबेन स्थापितासीत्। सम्पूर्णेह्यपि देशे प्रत्येकमपि वर्गस्य जनाः अस्मिन् पञ्चदशेह्यह्नि अमुना श्रमदानेन संयुताः अभूवन्। विविधाः संस्थाः अपि एतदर्थं सोत्साहं नैजं योगदानमकुर्वन्। विद्यालयीयाः महाविद्यालयीयाश्च छात्राः,NCC-NSS-युव-संघटन-सञ्चार-समूह-निगमाश्चेति सर्वेह्यपि, व्यापकाधारेण स्वच्छतायै श्रमदानमकुर्वन्। एतदर्थम् अहम् एतेभ्यः सर्वेभ्यः स्वच्छता-प्रेमिभ्यः देशवासिभ्यः भूरिशो हार्दिकं वर्धापनं वितरामि। आगच्छन्तु, दूरभाष-सम्भाषणमेकं शृण्मः-

'नमस्कारः। मम नाम शैतानसिंहः,राजस्थानस्य बीकानेर-जनपदे, पूगल-तालुकातः ब्रवीमि। अहं प्रज्ञा-चक्षुः अस्मि । नयन-द्वयेनापि किमपि द्रष्टुं नैव शक्नोमि। पूर्णतया प्रज्ञाचक्षुरस्मि। तर्हि यत् कथयितुमिच्छामि तदिदमेव यत् 'मन की बात'-कार्यक्रमे मोदि-वर्येण यः पदक्षेपः आरब्धः, नूनं सः उत्तमोत्तमः। वयं प्रज्ञा-चक्षवः शौच-गमनार्थं कष्टानि अनुभवन्तः स्मः। साम्प्रतं किमस्ति यत् प्रत्येकमपि गृहे शौचालयो विनिर्मितः, अत एवात्र वयम् अतितरां लाभान्विताः सञ्जाताः। पदक्षे- पोह्ययं नूनं उत्तमोत्तमः, कार्यमिदम् इतः परमपि प्रवर्तेत।'

भूरिशो धन्यवादाः, भवता अतितरां महत्वाधायिनी कथा प्रोक्ता, प्रत्येकमपि जीवने स्वच्छतायाः नैजं महत्वं भवति, अपि च,'स्वच्छ-भारताभियान'स्यान्तर्गतं भव- तः गृहे शौचालयो विनिर्मितः, तेन च भवान् सौविध्यमनुभवति, इतः परम् अस्माकं सर्वेषां कृते प्रसन्नतायाः अपरः को नाम विषयः स्यात्तथा च, कदाचिद् अमुना अभि- यानेन सम्बद्धाः जनाः अपि एतदनुमातुं नैवापारयन् यत् कश्चन प्रज्ञाचक्षुः अस्तीति कृत्वा शौचालयस्य अभावात् पूर्वं कियत्-काठिन्यमनुभवन् जीवनं यापयति स्म, तथा च, शौचालय-निर्माणानन्तरं भवतः कृते कियत् सुविधाकरमिदं बृहद्-वरदानं सिद्धम् । स्याद् भवान् अपि पक्षमेनं संयोजयन् दूरभाषं नैवाकरिष्यत् चेत्, अमुना स्वच्छताभि- यानेन सम्बद्धानामवधानमपि एतादृक्-संवेद्य-पक्षं प्रति नैवाभविष्यत्। अहं भवतः दूर- भाषस्य कृते,विशेषेण भवते धन्यवादं व्याहरामि।

मम प्रियाः देशवासिनः,'स्वच्छ-भारत-कार्यक्रमः' केवलं देशे एव नैव, परञ्च कृत्स्नेह्यपि जगति सफल-गाथात्वेन सिद्धोह्यस्ति यस्य विषये सर्वेह्यपि परिचर्चन्ते, क्रमेह्यस्मिन् भारतम्ऐतिहासिकं, जगतः श्रेष्ठं स्वच्छता-सम्मेलनम् आयोजयति।'महा- त्मगान्धि-अन्ताराष्ट्रिय-स्वच्छता-सम्मेलनम्' अर्थात्'Mahatma Gandhi International Sanitation Convention', यत्र अशेष-जगतः स्वच्छता-मन्त्रिणः एतत्-क्षेत्र-सम्बद्धाश्च विशेषज्ञाः सम्भूय स्वच्छता-विषयकान् स्वीयान् प्रयोगान् अनुभवान् च संविभाजयन्ति। 'महात्मगान्धि-अन्ताराष्ट्रिय-स्वच्छता-सम्मेलनस्य'समापनं ऐषमः ओक्टोबर-मासीये द्वितीये दिने बापू-वर्यस्य सार्धैक-शत-वर्षीयस्य जयन्ती-समारोहस्य शुभारम्भेण सहैव भविता।

मम प्रियाः देशवासिनः, संस्कृतवाङ्मये एका उक्तिरस्ति - 'न्यायमूलं स्वराज्यं स्यात'अर्थात् स्वराज्यस्य मूले न्यायो भवति,यदा न्यायस्य चर्चा भवति, तदा मानवाधिकाराणां भावः तत्र पूर्णतया समाहितो जायते। शोषितानांपीडितानां वञ्चितानाञ्च शान्ति-स्वतन्त्रयोः कृते, तेभ्यश्च न्यायं सुनिश्चेतुमिदम् विशेषेण अनि-वार्यमस्ति। डॉ0 बाबा-साहब-अम्बेडकरेण प्रदत्ते संविधाने निर्धनानां मैलिकाधिका- राणां रक्षायै अनेकानि प्रावधानानि विहितानि। तस्य तया दृष्ट्या प्रेरितः सन् विगते शताब्दे ओक्टोबर-मासे द्वादशे दिने 'National Human Rights Commission' (NHRC) अर्थात् 'राष्ट्रिय-मानवाधिकारायोगः' सङ्घटितः। कतिपय-दिनानन्तरं अस्यायोगस्य पञ्चविंशति-वर्षाणि पूर्णतां यास्यन्ति। आयोगोह्ययं न केवलं मानवाधिकारान् अरक्षत् परञ्च मानवीय-गरिमाणमपि अवर्धयत्। अस्माकं प्राण-प्रियः नेता अस्मदीय-देशस्य पूर्वप्रधानमंत्री श्री-अटलबिहारीवाजपेयी स्पष्टमिदम् अकथयत् यत् मानवाधिकारो हि अस्माकं कृते काचिद् अपरा अवधारणा नैवास्ति। अस्माकं 'राष्ट्रिय-मानवाधिकारायो- गस्य' प्रतीक-चिन्हे वैदिककालस्य आदर्शसूत्रं 'सर्वे भवन्तु सुखिनः' इत्यङ्कितमस्ति। आयोगोह्ययं मानवाधिकाराणां विषये व्यापिनीं जागृतिं व्यरचयत, युगपदेव अस्य दुरुप- योगमवरोद्धुम् अयं प्रशंसनीयां भूमिकां निरवहत् । पञ्च-विंशति-वर्षीय-यात्रायामस्याम् अयं हि देशवासिषु आशा-विश्वासयोः परिवेशं व्यरचयत्। कस्यचन स्वस्थसमाजस्य, उत्तमानां लोकतान्त्रिक-मूल्यानाञ्च कृते एषा महती आशाप्रदायिनी घटनास्तीति नूनमहम् अवगच्छामि। साम्प्रतं राष्ट्रिय-स्तरे मानवाधिकार-कार्यैः साकमेव षड्विंशतौ राज्येषु मानवाधिकारायोगाश्चापि सङ्घटिताः सन्ति। समाज-रूपेण अस्माकं कृते मानवाधिकाराणां महत्वमवबोद्धुं आचरितुञ्च परमावश्यकम् - अयमेव 'सर्वेषां सहभावः -सर्वेषां विकासः'- इति सूत्रस्य आधारोह्यस्ति।

मम प्रियाः देशवासिनः,ओक्टोबर-मासो भवेत्, श्रीजय-प्रकाश-नारायणस्य जन्म-जयन्ती स्यात्, राजमातुः विजयाराजेसिन्धिया-महाभागायाः जन्म-शताब्दी-वर्षञ्च प्रारभेत-एते सर्वेह्यपि महापुरुषाः अस्मान् अनारतं प्रेरयन्ति, एतेभ्यो नमोनमः, तथा च ओक्टोबरस्य अन्तिमे दिने सरदार-वल्लभ-साहबस्य जयन्ती वर्तते, आगामिनि 'मन की बात'-कार्यक्रमेह्यहं विस्तरेण सम्भाषिष्ये परञ्च अद्याहम् अवश्यमिदम् उल्लेखयितुं वाञ्छामि यतो हि विगतेभ्यः कतिचन-वर्षेभ्यः सरदार-साहबस्य जन्म-जयन्त्यवसरे ओक्टोबरस्य अन्तिमे दिने 'Run for Unity'- इति 'एकतायै धावनम्' हिन्दुस्थानस्य प्रत्येकमपि लघूनि बृहति च पुरे, ग्रामेषु उपनगरेषु चायोज्यते। अस्मिन् वर्षेह्यपि वयं प्रयत्नपूर्वकं स्वीये ग्रामे, नगरे, पुरे, उपनगरे, महानगरे च 'एकतायै धावनम्' आयोज-येम। 'एकतायै धावनम्'इत्येवास्ति सरदार-साहबस्य स्मरणस्य उत्तम-मार्गः, यतो हि असौ आजीवनं देशस्य एकतायै कार्याणि आचरत्। साग्रहमहम् तत्रभवतः निवेदयामि यत् ओक्टोबरस्य अन्तिमे दिने 'Run for Unity'- 'एकतायै धावनम्'-इत्यस्य माध्यमेन समाजस्य प्रत्येकमपि वर्गं देशस्य प्रत्येकमपि चैकांशम् एकता-सूत्रेण बध्नातुम् अस्म- दीयान् प्रयासान् सम्बलयन्तु, अयमेव च तस्य कृते उत्तमोत्तमः समुचितश्च श्रद्धाञ्ज- लिः भविता।

मम प्रियाः देशवासिनः, नवरात्रिः भवतु वा दुर्गापूजा स्यात्, विजयदशमी वा भवेद्, एतेषां पवित्र-पर्वणां कृते अहं भवद्भ्यः सर्वेभ्यः भूरिशः हार्दिकीः मङ्गल-कामनाः अर्पयामि। धन्यवादाः !

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।





श्रीबिल्वेश्वरसंस्कृतमहाविद्यालये दि0 24.09.2018 सोमवासरे सुसम्पन्ने सारस्वतसम्मानसमारोहे संस्कृतजगतः पञ्च महाविभूतीनां 1.आचार्य पं0 शिवजी उपाध्यायानाम् (अस्वास्थ्यकारणान्नागताः) 2.आचार्य महेशझा 'पस्टन' महाभागानाम् , 3..आचार्य रामपूजनपाण्डेयमहाभागानाम्,4..डॉ गणेशदत्तशर्ममहाभागानाम्,5..डॉ0 अरविन्दकुमारतिवारिमहाभागानां च सम्माननमथचडॉ0चिन्तामणिजोशीद्वाराविरचित' एका पत्नी महीयसी' काव्यस्य विमोचनं विदुषां करकमलैः सुसम्पन्नम् ।तत्सम्बन्धीनि चित्राणि---

प्रथमपुटस्य शेषभागः

# भारतस्य उज्ज्वल-ज्ञानपरम्परायाः.......

विडम्बनेयं पाश्चात्य-देशेषु उत्सुकतापूर्वकं संस्कृताध्ययनं चलति। कुत्रचित् तु एवमपि विषयाः पाठ्यन्ते यान् भारतीय संस्कृतज्ञाः न जानन्ति। एवं विविध-पक्षाणां व्यापकं चिन्तनं प्रस्तुवता भारतं विश्वगुरुं कर्तुं संस्कृतस्य पुनः प्रतिष्ठाः आवश्यकी इत्युक्तम्। सारस्वतातिथिः प्रो. रमेश चन्द्र-पण्डा कुलपतिः महर्षिः पाणिनि-संसकृत एवं वैदिक-विश्वविद्यालयः उज्जैनः मध्यप्रदेश आसीत् सः उक्तवान् यत् पाणिनीय-व्याकरणस्य प्रभावात् संस्कृतं सङ्गणकस्य कृते समुपयुक्ता भाषा वर्त्तते। महद्दुःखस्य विषयोऽस्तियत् संस्थासु पाणिनिव्याकरणं नहि पाठ्यते। यद्यपि आवश्यकता अस्ति। द्वयोः विधयोः जातृणां सम्मिल्य कार्यं सम्पादनस्य एतदभावे संस्कृतं संगणकीयभाषा अस्ति इति जयघोषमात्रं विधते। एवं विविध-भाषा-वैज्ञानिक-पक्षाणां संस्कृतेन सह अन्तः सम्बन्धात्मकं चिन्तनं प्रतिपादितम्।

विशिष्टातिधिः लखनऊ वि.वि संस्कृत-विभागाध्यक्षः प्रो.रामसुमेर यादववर्यः उक्तवान् यत् संस्कृतं ज्ञानेन सह व्यवसायात्मिका (रोजगारोत्पन्निका) भाषा अपि भवेत्।) सः उक्तवान् यत् संस्कृत-पाठ्यक्रमस्य सम्पूर्णे भारते समरुपता स्यात्। प्रतिवर्षं विश्वविद्यालयेषु महाविद्यालयेषु अध्यापकानां नियुक्तिः स्यात्।

एतदनन्तरं संगोष्ठ्याः प्रथमे पारम्परिके सत्रद्वये प्रो. हरिप्रसादः अधिकारी एवं प्रो. रामसुमेर यादव महोदयानाम् आध्यक्षे सम्पन्नम्। सत्रेऽस्मिन् डॉ. शेलेशकुमारतिवारी, उत्तराखण्ड संस्कृत-विश्वविद्यालय, हरिद्वारम्, डॉ. राजेन्द्र त्रिपाठी 'रसराज' इलाहाबाद डॉ. रामविनयासिंह देहरादूनम् डॉ. रचना शर्मा वाराणसी, डॉ. निरञ्जन मिश्र हरिद्वार डॉ.के.के.द्विवेदी, वाराणसी, डॉ. अरविन्द कुमार तिवारी बागपत एवं डॉ.वन्दना पाण्डेय मऊ अतिथि व्याख्यानं कृतवन्तः। अत्र योगायुर्वेद-दर्शन-शिक्षा-भाषाविज्ञान-ज्यौतिष-पुराण-भीमीसा-वेदादिशास्त्राणा अन्तः सम्बन्धात्मकं व्याख्यानानि जातानि। सायंकाले च प्रो. अभिराजराजेन्द्रमिश्र; शिमला पूर्व कुलपतिः सम्पूर्णानन्द संस्कृत-विश्वविद्यालयस्य आध्यक्षे कविसम्मेलनम् अपि सम्पन्नम्। द्वितीयदिवसे मानविकी-विज्ञान एवं प्राद्योगिकि विषयाणां चतुर्षु सत्रेषु प्रो. अभिराज-राजेन्द्र-मिश्र, प्रो. प्रभुनाथ द्विवेदी, डॉ. सतीशचन्द्रकुमार डॉ.ओमप्रकाश पाण्डेय महोदयानाम् आध्यक्षे डॉ. सुशील पाण्डे डॉ.विवेकपाण्डेय, डॉ. भारतेन्दु द्विवेदी डॉ. सुखदा,डॉ. रविशंकर पाण्डेय, डॉ. सिकन्दर लाल प्रो.रामसुमेर यादव, डॉ.तेजप्रकाशचतुर्वेदी डॉ.सूर्यकान्त त्रिपाठी, डॉ. आशुतोष द्विवेदी प्रभृतयः विभिन्न राज्येभ्यह समागताः विद्वान्सः कृपि-भूगोल-इतिहास-राजनीति-प्रबन्धन-जलसंरक्षण-ऊर्जापर्यावरण-विज्ञान-अभियान्त्रिकी-प्रौद्योगिकीत्यादि-विषयेषु सह अन्तः सम्बन्धात्मकं विशिष्टं विराहं च व्याख्यानं च दत्तवन्त।

सम्पूर्ति सत्रे-मुख्यवक्ता नासावैज्ञानिकः, पूर्ववैज्ञानिकसलाहकारः भारतसर्वकारस्य डॉ. ओमप्रकाश पाण्डेयवर्यः सम्बोधितवान् यत् पृथिव्यां स्थिताः सन्तः सम्पूर्णम् अन्तरिक्षं भ्रमितवन्तः स्मः। ध्वनिविज्ञानं सम्यक्तया विवेचितवान्। सूर्यरश्मिभिः ध्वनिआगच्छति तत्र अंकंक्षं.......... ., एवं सर्वतः ध्वनिः आगच्छति। आधुनिकानां इलेक्ट्रानविश्लेषणं अष्टवसु-शक्ति, अष्टाक्षरारुपेण कुर्वन्ति संस्कृतज्ञाः 72 व्यञ्जनाक्षरानि 36 स्वराः सम्मिल्य 108 वर्णमाला मातुः सरस्वत्याः हस्ते अस्ति। सर्वेऽपि जीवाः एतान्येव अक्षराणि उच्चारयन्ति। तैरुक्तं यत् हिन्दी यदि अस्माकंराष्ट्रभाषा अस्ति, आंग्लं विश्वस्य सम्पर्क भाषा अस्ति तर्हि संस्कृतं ब्राह्मण्ड भाषा अस्ति। वेदेषु विज्ञानमेवास्ति वैदिकाः वेदमन्त्रोच्चारण मात्रेण न तत् साधयितुं शक्नुवन्ति तदर्थं तदनुगुणं कार्यमपेक्षेत एवमेव विविधवैज्ञानिकपक्षणां संस्कृतेन सम्बन्धं सुस्पष्टता वर्णितवान् महोदयः।

अवसरेऽस्मिन् डॉ. प्रवीणकुमार मध्येशिया, श्री तेजनाथ मौर्य, डॉ. हरिश्चन्द्र श्रीवास्तव प्रभृतयः मान्याः सहयोगिनः सम्मानिताः, धधन्यवादज्ञापनं संगोष्ठयाः सह-संयोजकाः, इतिहासविदः डॉ.अवधेशसिंह महोदयः कृतवज् सञ्चालनं आयोजनसचिवः डॉ. चन्द्रकान्त दत्त शुक्ल महोदयः स्पादितवान्।



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।